श्रीमच्छङ्कराचार्यप्रणीता

॥ वाक्यसुधा ॥

(दृग्दृश्यविवेकः)

श्रीमद् ब्रह्मानन्दभारती प्रक्लृप्तया टीकया सहिता

CHINMAYA FOUNDATION SERIES - 2

First Edition - 1989
No. of Copies - 250

Printed at :
ELANGO ACHUKOODAM, 166, R. H. Road, Mylapore, Madras - 4.
Phone : 74121

श्रीगणेशाय नमः ।
श्रीसच्चिदानन्दजगद्गुरवे नमो नमः ।

श्रीमच्छङ्कराचार्यप्रणीता वाक्यसुधा

श्रीमद्ब्रह्मानन्दभारतीप्रक्लृप्तया टीकया सहिता ।

यस्मात्सर्वं समुत्पन्नं चराचरमिदं जगत् ।
इदं नमो नटेशाय तस्मै कारुण्यरूपिणे ॥ १ ॥

कारणं खादिजगतां तारणार्थमनागसाम् ।
वारणाननमात्मानमद्वयं समुपास्महे ॥ २ ॥

परापश्यन्त्यादिदेहां प्रणताभीष्टदायिनीम् ।
सत्यज्ञानानन्दरूपां ध्याये ह्याद्यां सरस्वतीम् ॥ ३ ॥

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
मया वाक्यसुधाटीका यथामति विरच्यते ॥ ४ ॥

न ख्यातिर्लाभपूजे च टीकाकरणकारणम् ।
न विद्वत्ताबलं वाऽत्र मुक्तिरेवात्र कारणम् ॥ ५ ॥

प्रारीप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनाय शिष्टाचारपरिपालनाय च केवलकूटस्थप्रत्यग्बोधरूपपरमात्मस्वरूपानुस्मरणलक्षणं मङ्गलमाचरन् सच्चिदानन्दाखण्डैकरसस्वरूपावस्थानलक्षणस्य मोक्षस्य तत्त्वमस्यादिमहावाक्यार्थापरोक्षज्ञानफलत्वाद्वाक्यार्थज्ञानस्य चान्वयव्यतिरेकाभ्यां पदार्थपरिशोधनपूर्वकत्वात्पदार्थपरिशोधनस्य प्रसिद्धानुवादेनाप्रसिद्धं निरूपणीयमिति न्यायेन प्रतिशरीरमहमहमिति प्रसिद्धजीववाचकत्वंपदार्थपरिशोधनपूर्वकत्वात् श्रीमच्छारीरकमहाशास्त्रे श्रीमद्भाष्यकारैः प्रतिपादितमर्थं हृदि निधाय प्राण्यनुजिघृक्षया दृग्दृश्यविवेकद्वारा प्राधान्येन त्वंपदार्थपरिशोधनपरमिदं प्रकरणमारभमाणः परमकृपानिधिः श्रीभारतीतीर्थगुरुः प्रकरणप्रतिपाद्यमानमर्थं संक्षिप्य प्रथमश्लोकेन तावद्दर्शयति ।

सव्याख्यायां वाक्यसुधायाम् ।

श्रीरामचन्द्राय नमः ।

रूपं दृश्यं लोचनं दृक् तद्दृश्यं दृक् तु मानसम् ।
दृश्या धीवृत्तयः साक्षी दृगेव न तु दृश्यते ॥ १ ॥

रूपमिति ॥ लोके चक्षुरिन्द्रियग्राह्यं यद्रूपमस्ति तत्सर्वं दृश्यं भवति । तद्ग्राहकं चक्षुरिन्द्रियं, स्वग्राह्यापेक्षया दृग्भवति, तथा तत्पुनश्चक्षुरिन्द्रियं स्वस्मादप्यान्तरस्य मनसो दृश्यं भवति, स्वभास्यचक्षुरिन्द्रियापेक्षया मानसमपि दृग्भवति, द्रष्टृ भवति । मनसः सर्वेन्द्रियावभासकत्वसामर्थ्यं द्योतयति तुशब्दः । धीवृत्तयः अन्तःकरणस्य वक्ष्यमाणवृत्तयस्तदविद्याकार्यत्वेन जड़रूपत्वात् दृश्या भवन्ति । साक्षी शरीरत्रयविलक्षणः प्रत्यगात्मा दृगेव भवति द्रष्टैव भवति । एवकारेणार्थाद्दृश्यत्वे निषिद्धेऽपि कण्ठतोऽपि दृश्यत्वं निषेधयन्प्रत्यगात्मनो द्रष्टृत्वमेव द्रढयति, न तु दृश्यते इति । साक्षिणि वर्तमानस्य दृक्त्वस्य सर्वान्तरत्वे सापेक्षितत्वाभावात्ततस्तस्य लोचनमानसयोर्वर्त्तमानदृक्त्ववैलक्षण्यं द्योतयति द्वितीयस्तुशब्दः । साक्षिणः दृश्यत्वमप्रामाणिकमिति यस्मात्तस्मात्कालत्रयेऽपि दृक्त्वमेवास्य स्वरूपमिति भावः ॥१॥

एवं प्रकरणे प्रतिपाद्यमानमर्थं संक्षिप्य प्रथमश्लोकेन दर्शयित्वा इदानीं प्रथमश्लोकस्य प्रथमपादेन दर्शितमर्थं द्वितीयश्लोकेन स्पष्टयति

नीलपीतस्थूलसूक्ष्मह्रस्वदीर्घादिभेदतः ।
नानाविधानि रूपाणि पश्येल्लोचनमेकधा ॥ २ ॥

नीलेति ॥ दृश्यत्वदृक्त्वयोर्नानात्वैकत्वहेतुकत्वान्नीलपीताद्यनेकभेदभिन्नत्वेन दृश्यत्वं प्राप्तानि रूपाणि चक्षुरिन्द्रियं स्वयं स्वग्राह्यरूपभेदानुकूलस्वरूपभेदमगृहीत्वैव एकरूपेणैव पश्येत् गृह्णीयात् । अत एवास्य दृक्त्वं स्यादिति भावः ॥ २ ॥

एवं प्रथमश्लोकस्य द्वितीयपादोक्तमर्थं स्पष्टीकुर्वन् चक्षुरिन्द्रिये प्रदर्शितन्यायं श्रोत्रादीन्द्रियेष्वप्यतिदिशति

आन्ध्यमान्द्यपटुत्वेषु नेत्रधर्मेषु चैकधा ।
सङ्कल्पयेन्मनः श्रोत्रत्वगादौ योज्यतामिदम् ॥ ३ ॥

आन्ध्यमिति ॥ आन्ध्यं नाम सामान्याकारेणापि स्वविषयग्रहणासामर्थ्यं, विषयसामान्याकारग्राहकत्वं मान्द्यं, स्वविषयसूक्ष्मविशेषाकारग्रहणसामर्थ्यं पटुत्वम् । एवमत्र नेत्रधर्मेषु आन्ध्यमान्द्यादिभेदभिन्नेष्वपि नानात्वेनैव हेतुना भास्य*मानान् तान्नेत्रधर्मान् भास्यभेदानुरूपस्वरूपभेदमगृहीत्वैकरूपेणैव मनः सङ्कल्पयेत्, मम चक्षुरन्धं मम चक्षुर्मन्दं मम चक्षुः पट्विति । अत एवास्य मनसो दृक्त्वं भवतीत्यर्थः । श्रोत्रत्वगादीत्यत्र चशब्दः सम्बध्यते, श्रोत्रत्वग्जिव्हाघ्राणेष्वपीदं स्वविषयापेक्षया दृक्त्वं स्वभासकमानसापेक्षया

*भासमानानिति वा पाठः ।

दृश्यत्वं यथोचितं बाधिर्यादिकञ्च योज्यतामुह्यतामित्यर्थः । एकस्मिन्निन्द्रिये दृग्दृश्यविवेकं दर्शयित्वा श्रोत्रादीन्द्रियान्तरेष्वप्येवं योज्यतामित्यतिदिशति । आचार्यस्य स्वशिष्यैः स्वबुद्ध्या क्रियमाणो दृग्दृश्यविवेक एव पुरुषार्थोपायो भवतीत्यभिप्रायः ॥ ३ ॥

प्रथमश्लोकस्योत्तरार्द्धे साक्षी दृगेवेत्यन्तेन ग्रन्थेन प्रदर्शितमर्थं विशदयति

कामः सङ्कल्पसन्देहौ श्रद्धाऽश्रद्धे धृतीतरे ।
ह्रीर्धीर्भीरित्येवमादीन्भासयत्येकधा चितिः ॥ ४ ॥

काम इति ॥ रज्ज्वज्ञानाद्रज्ज्वारोपितान् सर्पादीन् रज्जुरिव स्वाज्ञानात्स्वस्मिन्नारोपितान् कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति बृहदारण्यकश्रुत्युक्तानादिशब्देन संगृहीतानैतरेयोपनिषद्युक्तान्संज्ञादींश्च स्वरूपज्ञानापनोद्यानेतान् सर्वानप्यन्तःकरणवृत्तिविशेषान्स्वगतादिभेदरहितसच्चिदानन्दलक्षणब्रह्माभिन्न - कूटस्थप्रत्यग्रूपा सर्वसाक्षिणी चितिरेकधा भासयति । विकारकारणाभावात्स्वभास्याऽवस्तुभूतविकारानुरूपं स्वगतविकारमन्तरेणाप्येकरूपेणैव प्रकाशयतीति यावत् ॥ ४ ॥

इन्द्रियमनसोरुक्तन्यायेन उक्तलक्षणायाश्चितेरपि दृश्यत्वं स्यादित्याशङ्कायां दृश्यत्वस्य द्रष्टृपूर्वकत्वाच्चितेर्द्रष्टृत्वेन चित्यन्तराङ्गीकारेणानवस्थाख्यो दोषः स्यात्, चितेश्चितिरेव द्रष्ट्रीत्यस्मिन् पक्षेऽपि कर्मकर्तृविरोधः स्यात्तस्मात्प्रकाशान्त-

रनिरपेक्षतया स्वयंप्रकाशमानायाश्चितेर्दृश्यत्वं न स्यादित्यर्थतो दर्शयन्मुखतः स्वव्यतिरिक्तान्तःकरणादियुष्मदर्थेभ्यश्चितेर्वैलक्षण्यं "न तु दृश्यते" इत्यंशविवरणेनानेन श्लोकेन दर्शयति ।

नोदेति नास्तमेत्येषा न वृद्धिं याति न क्षयम् ।
स्वयं विभात्यथान्यानि भासयेत्साधनं विना ।। ५ ।।

नोदेतीति ।। यत्साक्षादपरोक्षाद्ब्रह्मेति श्रुत्युक्तप्रकारेण विद्वदपरोक्षतां चितेरर्थात्सूचयन् उक्तलक्षणां चितिं परामृशत्येषेति । सर्वसाक्षिण्येषा चितिरहमादियुष्मदर्थवत्प्रागभावाभावान्नोदेति नोत्पद्यते, प्रध्वंसाभावाभावान्नास्तमेत्यन्तं विनाशं न प्राप्नोति । वृद्धिक्षयौ ताभ्याम् उपलक्षितौ अस्तित्वपरिणामौ च न प्राप्नोति । सर्वथाऽप्येकरूपत्वादुत्पत्त्यनन्तरं भाविव्यावहारिकास्तित्वमेव विकारान्तःपातित्वेन निषिध्यते । न तु स्वरूपास्तित्वं तस्याविकारत्वेन निषेद्धुमशक्यत्वात् चितेः षड्भावविकाररहितत्वे हेतुं दर्शयति स्वयं विभातीति । एषा चितिः स्वस्य प्रकाशान्तरनिरपेक्षतया स्वयंप्रकाशमाना सती सच्चिदानन्दात्मकस्वरूपप्रकाशानन्तरमेव स्वव्यतिरिक्तान्यखिलान्यारोपितवस्तूनि भासयेत् प्रकाशयेत्, "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाती"ति श्रुतेः । सविकल्पस्य ज्ञानस्य निर्विकल्पकज्ञानपूर्वकत्वाच्चात्रानुमानद्वयं सूचितम् । अस्मत्प्रत्ययविषया एषा चितिः षड्भावविकाररहिता प्रकाशान्तरनैरपेक्ष्येण स्वयंप्रकाशमानत्वात् यत्षड्भावविकाररहितं न भवति तत्प्रकाशान्तरनैरपेक्ष्येण

स्वयंप्रकाशमानमपि न भवति, यथा युष्मत्प्रत्ययविषयोऽहमादिः । उक्तलक्षणा एषा चितिः षड्भावविकाररहिता प्रकाशान्तरनैरपेक्ष्येण स्वव्यतिरिक्तवस्त्ववभासकत्वात् यन्नैवं तन्नैवं यथाऽहमादिरित्येवमुक्तप्रकारेण स्वयंप्रकाशमानत्वात्, षड्भावविकाररहितत्वाच्च युष्मदर्थवैलक्षण्ये समर्थिते सति, चितेः कालत्रयेऽपि दृक्त्वमेव स्वरूपं, न तु दृश्यत्वमित्यर्थात्समर्थितं भवति "अदृष्टं द्रष्टृश्रुतं श्रोतृममतं मन्तृ अविज्ञातं विज्ञातृ" "न दृष्टेर्द्रष्टारं पश्येन्न श्रुतेः श्रोतारं श्रुणुयान्न मतेर्मन्तारं मन्वीथाः न विज्ञातेर्विज्ञातारं विजानीया" इत्यादिश्रुतिसहस्रेणाप्ययमेवार्थस्तात्पर्येण प्रतिपाद्यत इति । अतो युष्मत्प्रत्ययविषयान्तःकरणादिरूपं दृश्यमेवास्मत्प्रत्ययावलम्बनभूतायाः प्रत्यक्चितेः स्वरूपं दृक्त्वमेवातः प्रत्यक्चितिरेव परं ब्रह्मेत्ययमेवाभिप्रेतार्थः ।। ५ ।।

ननु युष्मदर्थविभासकत्वं प्रथमश्लोके साक्षिण इत्युक्तम् । अत्र तु चितेरित्युक्तम्, अतः पूर्वापरविरोध इति चेन्नैष दोषः, प्रथमश्लोकोक्तसाक्षिण एवात्र चितिशब्देन परामृष्टत्वात्तस्यैव पुनः प्रथमश्लोकार्थविवरणेन प्रकरणपरिसमाप्तिपर्यन्तेनोत्तरग्रन्थसन्दर्भेणापि तत्र तत्र साक्षिशब्देन परामृष्ट*त्वात्साक्षी चितिश्चिच्चैतन्यं ज्ञानं बोधः प्रत्यगात्मा कूटस्थ इत्यादिशब्दानामेकार्थपर्यवसायित्वाच्च । ननु तर्हि युष्मदर्थस्यान्तःकरणस्य सापेक्षकं दृक्त्वमपि न सम्भवति भौतिकत्वेन जडात्मकत्वाद्घटादिवत्, द्रष्टरि नास्ति दृश्यत्वं दृश्यस्य द्रष्टृता,

*परामृश्यत्वादिति वा पाठः ।

न हि दृश्यरूपस्य कुडयादेर्द्रष्टृता, "न हि दृश्यते" इति
पुराणवचनाच्च । तथा सति तस्य संसारो नोपपद्यते । अथवा
पूर्वोक्तप्रकारेणाहमादिविलक्षणस्य कूटस्थस्य स्वयंप्रकाशप्रत्य-
ग्बोधरूपस्य साक्षिणश्च जाग्रदादिविमोक्षान्तः संसारो नोप-
पद्यते, तस्यासङ्गोदासीनत्वात् । योऽसंसारी न भवति सो
ऽसङ्ग उदासीनोऽपि न भवति यथाहमादिः, असङ्गो ह्ययं
पुरुष इत्यादि श्रुतिसद्भावाद्धेतुरसिद्धो न भवत्येवमुक्तप्रकारे-
णान्तः करणतत्साक्षिणोरुभयोरप्यसंसारित्वे समर्थिते सति
निवर्त्यसंसाराभावात्तन्निवर्तकज्ञानस्यापि नैरर्थक्यं स्यात्ततस्त-
ज्ज्ञानप्रतिपादकवेदान्तवाक्यानामप्यप्रामाणिकत्वप्रसङ्गः स्यात्
पुनरुक्तलक्षणस्याशेषविशेषशून्यस्य साक्षिणः शब्दप्रवृत्तिनिमि-
त्तषष्ठ्यादिरहितत्वेन वेदान्तवाक्यैर्विधिमुखेन प्रतिपाद्यमान-
त्वासम्भवात् अतस्तन्निरसनमात्रेण तद्रूपाप्रसिद्धेश्च शास्त्रस्या-
प्रामाण्यं प्रसज्येत । एवं परम्परयाऽनेकदोषसम्भवात्साक्षिणः
कूटस्थत्वस्वयंप्रकाशमानत्वादिकमप्यप्रामाणिकं स्यादित्यनेक-
दोषमाशङ्क्यान्तःकरणप्रतिफलितानिर्वचनीयचिच्छायाङ्गी –
कारे सति सर्वोऽपि दोषः परिहृतः स्यादित्यभिप्रेत्य चिच्छायां
तावदङ्गीकरोति—

चिच्छायावेशतो बुद्धौ भानं धीस्तु द्विधा स्थिता ।
एकाहङ्कृतिरन्या स्यादन्तःकरणरूपिणी ।। ६ ।।

चिच्छायेति ।। चिच्छायावेशतो बुद्धौ भानं रजत-
सुवर्णादिवद् बहुविधपरिणामार्हमन्तःकरणाख्यं द्रव्यमत्र बुद्धि-
शब्देन धीशब्देन चोच्यते । तस्यान्तःकरणस्य कर्तृस्वरूपवृत्ति

मदंशोऽहंकृतिशब्देनोच्यते, करणस्वरूपमनःशब्दवाच्याहमिद-
मात्मिकवृत्त्यंशोऽन्तःकरणशब्देनोच्यते । तत्र श्रोत्रादिकरणा-
पेक्षया अन्तःकरणत्वादन्तःकरणं बुध्यते । अनया चिच्छाया-
वेशतः । चिच्छाया चित्प्रतिबिम्बं तस्या आवेशोऽनुप्रवेश-
स्ततो स्वरूपमिति बुद्धिस्तस्यां भानं स्यात् । स्वभावतो
जडरूपाऽप्यनुप्रविष्टचैतन्यबलाद्बुद्धिः स्वयंप्रकाशमानेव भव-
तीति यावत् । धीस्तु द्विधा । तुशब्दोऽवधारणे । भ्रामक-
सन्निधौ लोहवत्साक्षिसन्निधौ बहुविधचेष्टा स्थिता कुर्वती
सा धीर्द्विधैव स्थिता । तयोर्मध्ये एका धीरहङ्कृतिशब्दवाच्य-
कर्तृरूपा स्यात् अन्या धीर्मनःशब्दवाच्याऽन्तःकरणरूपिणी
स्यात् । कामादीनां संज्ञादीनां च सर्वेषामप्यन्तःकरणपरिणा-
मविशेषाणां मनोबुद्ध्यहङ्कारचित्ताख्येष्वन्तःकरणचतुष्टयेष्व-
न्तर्भूतत्वात्, बुद्धिचित्तयोरपि यथाक्रममहङ्कारमनसोरेवान्त-
र्भूतत्वाद्वृत्तिमद्वृत्तिलक्षणाकारद्वयव्यतिरिक्तान्तःकरणाकारान्त-
रस्य निरूपयितुमशक्यत्वात् । चित्कर्मभूताबुद्धिः स्वविकारा-
नुकारिणाऽनुप्रविष्टचैतन्येन सहिताऽहङ्कारमनःशब्दवाच्यकर्तृ-
करणात्मकवृत्तिमद्वृत्तिलक्षणाकारद्वयेनैकावस्थितेति भावः।।६।।

उक्तलक्षणयोरहङ्कारमनसोर्मध्येऽहङ्कारस्य चिच्छायया
सह तप्तायःपिण्डवत्तादात्म्यात्तेन सच्चिदाभासाहङ्कारेण
तादात्म्याज्जडरूपोऽपि देहश्चेतनत्वं प्राप्नुयादित्याह—

छायाहङ्कारयोरैक्यं तप्तायःपिण्डवन्मतम् ।
तदहङ्कारतादात्म्याद्देहश्चेतनतामगात् ।। ७ ।।

छायेति ।। छायाहङ्कारयोश्चिदाभासकर्त्रोरैक्यं तप्तायःपिण्डवद्वह्निसम्बन्धेन तद्रूपं तप्तायःपिण्डवन्मतमभिप्रेतं, यथा दृष्टान्ते अयमग्निरिदमय इति पृथक्करणमशक्यं तथा दार्ष्टान्तिकेऽप्ययमहङ्कार इयं चिच्छायेत्यहङ्कारस्वरूपस्य तत्रानुप्रविष्टचिच्छायास्वरूपस्य च पृथक्करणमशक्यमिति भावः । तदहङ्कारतादात्म्यात्तेन चिच्छायासहितेनाहङ्कारेण तादात्म्यात् सोऽहङ्कार आत्मा नाम स्वरूपं यस्य देहस्य स तदात्मा, तस्य भावस्तादात्म्यं सम्बन्ध इत्यर्थः । तस्माद्देहः स्थूलशरीरं स्वयं जडरूपमपि चेतनतां चेतनं ज्ञातं तस्य भावश्चेतनता तां ज्ञानस्वरूपतामगात्प्राप्नुयादित्यर्थः । यथा पयसि परीक्षणार्थं प्रक्षिप्तो मरकतमणिः पयोशेषमात्मच्छायं कुर्यात्तथा स्वभावत एव सर्वान्तरः कूटस्थोऽसङ्गबोधरूपः साक्ष्यप्यहङ्कारादिस्थूलदेहपयन्तमशेषं युष्मदर्थमात्मच्छायं कुरुते इति भावः ।। ७ ।।

नन्वेवमहङ्कारस्य चिच्छायादेहाभ्यां तादात्म्ये सत्यहं पश्याम्यहं शृणोमीत्यादेरनुभवसिद्धत्वादिन्द्रियैरपि तादात्म्यमस्तीत्याशङ्क्य इन्द्रियाणां स्वस्वगोलकस्थानमन्तरेण स्वस्वविषयग्रहणसामर्थ्याभावाद्गोलकानां च स्थूलशरीरावयवत्वादवयवावयविनोर्भेदाभावान्मनुष्योऽहं ब्राह्मणोऽहं गृहस्थोऽहं कृष्णकेशोऽहमित्यादिवदहं चक्षुरहं श्रोत्रमित्याद्यनुभवाभावात्कस्त्वमिति पृष्टे अहमिति वदतो देहस्यैव स्पृश्यमानत्वाच्चेन्द्रियतादात्म्यस्यापि देहतादात्म्येऽन्तर्भूतत्वात्पृथक् न निरूपणीयमित्यहङ्कारस्य सम्बन्ध्युद्देशद्वारेण तादात्म्यस्येयत्तां दर्शयति—

अहङ्कारस्य तादात्म्यं चिच्छायादेहसाक्षिभिः ।
सहजं कर्मजं भ्रान्तिजन्यञ्च त्रिविधं क्रमात् ॥ ८ ॥

अहङ्कारस्येति ।। अहङ्कारस्येत्युक्तलक्षणस्य कर्तुश्चिच्छायादेहसाक्षिभिः चिच्छायया देहेन साक्षिणा च सह क्रमात्सम्बन्ध्युद्देशक्रमेण त्रिविधं त्रिप्रकारं तादात्म्यं सम्बन्धस्तेषां तादात्म्यानां सदर्थानि* नामानि कल्पयति । सहजं चिच्छायाहङ्कारयोर्यत्तादात्म्यं तत्सम्बन्धिनोरुभयोरप्युत्पत्तिकाले सहैव जायते इति सहजमित्युच्यते । कर्मजम् उक्तलक्षणाहङ्कारस्य देहस्य च यत्तादात्म्यं तदन्वयव्यतिरेकाभ्यां जाग्रद्भोगप्रदकर्मणैव जायते इति कर्मजमित्युच्यते । भ्रान्तिजन्यमधिष्ठानयाथात्म्याज्ञानं भ्रान्तिशब्देनोच्यते, अहङ्कारसाक्षिणोर्यत्तादात्म्यं तदनाद्यनिर्वचनीयभ्रान्त्यैव जायते इति भ्रान्तिजन्यमित्युच्यते । तादात्म्यत्रयसमुच्चयार्थश्चशब्दः । अत्रायं प्रयोगः । अहङ्कारसाक्षिणोस्तादात्म्यमधिष्ठानयाथात्म्याज्ञानजन्यमधिष्ठानयाथात्म्यज्ञानापनोद्यत्वात्, यद्यदधिष्ठानयाथात्म्यज्ञानापनोद्यं तत्तदधिष्ठानयाथात्म्याज्ञानजन्यं, यथा रज्जुसर्पादीनां तादात्म्यं तथा चेदमधिष्ठानयाथात्म्यज्ञानापनोद्यं। तस्मादधिष्ठानयाथात्म्याज्ञानजन्यमेवेति । एवमहङ्कारस्य चिच्छायादेहसाक्षिभिः सम्बन्ध्युद्देशक्रमेणैवोक्तलक्षणं त्रिविधं तादात्म्यमस्तीति शेषः ।। ८ ।।

ननु तर्हि "ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्" एवमनादिरनन्तो नैसर्गिकोऽयमिति च श्रीभगवद्भाष्यकारा-

*समर्थानीति वा पाठः ।

भ्यामुक्तत्वादहङ्कारसाक्षिणोस्तादात्म्यस्य निवृत्तिर्नास्त्यत एव निःशेषदुःखोच्छित्तिनिरतिशयानन्दावाप्तिलक्षणमोक्षोऽप्याशामात्रमित्याशङ्क्य ब्रह्मात्मज्ञानपर्यन्तमेव भ्रान्तिजन्यतादात्म्यस्याऽविनाशित्वेन ताभ्यां विवक्षितत्वात् अन्यथा स्ववाक्य विरोधात्सर्वेषामपि मोक्षशास्त्राणामप्रामाण्यप्रसङ्गाच्च, मुमुक्षूणामपि सर्वेषां मोक्षविषयश्रवणादिप्रवृत्त्यभावाच्च, कर्मजन्यतादात्म्यनिवृत्तेश्च, प्रतिदिनं सुषुप्तावनुभूतत्वाच्च, सहजतादात्म्यातिरिक्तयोरपि तादात्म्ययोः स्वस्वकारणनाशद्वारा निवृत्तिरस्त्येव । सहजतादात्म्यस्य तु सहजत्वादेव निवृत्तिर्नास्तीत्याह—

सम्बन्धिनोस्सतोर्नास्ति निवृत्तिः सहजस्य तु ।
कर्मक्षयात्प्रबोधाच्च निवर्तेते क्रमादुभे ॥ ९ ॥

सम्बन्धीति ॥ सम्बन्धिनोः सतोः परस्परसम्बन्धित्वेनैवोत्पद्यमानयोरुत्पत्तिकाले एव सम्बन्धिनोरित्यर्थः । तुशब्दोऽवधारणे । सहजतादात्म्यस्येतरतादात्म्यवैलक्षण्यद्योतनार्थो वा । उक्तलक्षणयोश्चिच्छायाहङ्कारयोः सहजाख्यस्य तादात्म्यस्य निवृत्तिर्नास्त्येव परस्परं । पृथग्भावो न सम्भवत्येव । सुषुप्तिमूर्छामरणादौ जाग्रद्भोगप्रदकर्मक्षयात् जाग्रत्काले श्रुत्याचार्यानुग्रहबलेनाहं ब्रह्मास्मीति ब्रह्मात्मैक्यसाक्षात्काराच्च कर्मजन्यभ्रान्तिजन्याख्ये उभे अपि तादात्म्ये निमित्ताभावान्नैमित्तिकस्याप्यभाव इति न्यायेन क्रमान्निवर्तेते । कर्मक्षयात् कर्मजं तादात्म्यं निवर्तते । अहङ्कारदेहाख्यावुभावपि सम्बन्धिनौ परस्परसम्बन्धं त्यजेते इत्यर्थः । प्रबोधाद-

प्रबोधक्षये सति भ्रान्तिजन्यमपि तादात्म्यं निवर्तते, बोधानन्तरं साक्षिसम्बन्धराहित्येनाप्यहङ्कारप्रतीतिरन्यदृष्ट्यैव स्वदृष्ट्या निवर्तते, यथा शुक्तिकाज्ञानात्तत्स्वरूपाज्ञाने नष्टे सति तत्रैव रजतं लीयते तथा स्वरूपपरिज्ञानात्स्वरूपाऽपरिज्ञाने नष्टे सति स्वस्मिन्नेवाहङ्कारो लीयते एव ॥ ९ ॥

संक्षेपेणावस्थात्रयस्वरूपमन्वयव्यतिरेकाभ्यां देहस्याचेतनत्वञ्च दर्शयति—

अहङ्कारलये सुप्तौ भवेद्देहोऽप्यचेतनः ।
अहङ्कारविकासार्द्धः स्वप्नः सर्वस्तु जागरः ॥ १० ॥

अहङ्कारेति ॥ स्थूलसूक्ष्मभोगद्वयप्रदकर्मक्षयात्स्वकारणा*ज्ञाने अहङ्कारे लीने सति तदहङ्कारलयावस्था सुषुप्तिरित्युच्यते । तस्यामवस्थायां पूर्वमहङ्कारसम्बन्धाच्चेतनत्वेन भातो देहोऽप्यचेतनो भवेत् "अन्धः सन्ननन्धो भवति, विद्धः सन्नविद्धो भवति, उपतापी सन्ननुपतापी भवती" त्यादिश्रुतेः । अहङ्कृतिविकासार्द्धः स्वप्नः सूक्ष्मभोगकर्मण्युद्बुद्धे सति तद्वशात्स्वकारणा**ज्ञानादुत्पन्नस्याहङ्कारस्य स्वव्यतिरिक्तवस्त्वन्तराभावेऽपि जाग्रज्जनितसंस्कारमात्ररूपभोगार्थं स्थूलशरीराभिमानमन्तरेणापि शरीरस्यान्तःसूक्ष्मनाडीप्रचारो यः स एव तस्याहङ्कारस्यार्द्धविकासः, स एव स्वप्न इत्युच्यते । तत्राहङ्कारव्यतिरिक्तवस्त्वन्तराभावे श्रुतिः "न तत्र रथा-

*क्षयात्सकारणाज्ञाने इति वा पाठः ।

**तद्वशात्सकारणाज्ञानादिति वा पाठः ।

नरथयोगा न पन्थानो भवन्ती" त्यादिः । सर्वस्तु जागरः स्थूलभोगप्रदकर्मण्युद्बुद्धे सति तद्वशादापादमस्तकं स्थूलदेहेऽभिव्याप्तस्याहङ्कारस्य सर्वेन्द्रियैः सर्वविषयज्ञानं यत्स एव तस्याहङ्कारस्य पूर्णविकासस्तदेव जागरणमित्युच्यते । अस्यामवस्थायां पुनरहङ्कारसम्बन्धाद्देहः पूर्ववच्चेतनत्वेन भासते । उभयत्राहङ्कारे समाने स्वप्नाज्जागरितस्येन्द्रियविषयसद्भावात्मकवैलक्षण्यद्योतनार्थस्तुशब्दः । अत्र दर्शितेऽवस्थात्रयलक्षणे माण्डूक्यतापिनीयाद्युपनिषदः प्रमाणानि "दक्षिणाक्षिमुखे विश्वो मनस्यन्तस्तु तैजसः । आकाशे च हृदि प्राज्ञस्त्रिधा देहे प्रतिष्ठितः" इन्द्रियैरर्थोपलब्धिर्जागरितं, करणेषूपसंहृतेषु जागरितसंस्कारप्रत्ययसविषयः स्वप्नः, सर्वप्रकारकज्ञानोपसंहारो बुद्धेः कारणात्मनाऽवस्थानं, सुषुप्तिरित्यादीनि श्रीमद्गौडपादाचार्यभगवत्पादाचार्यादिपूर्वाचार्यवचनानि च ॥ १० ॥

एवं कर्तृव्यापारं निरूप्य करणस्यापि क्रियाव्याप्यत्वं तत्क्रियां दर्शयति—

अन्तःकरणवृत्तिश्च चितिच्छायैक्यमागता ।
वासनाः कल्पयेत् स्वप्ने बोधेऽक्षैर्विषयान्बहिः ॥ ११ ॥

अन्तःकरणेति ॥ अन्तःकरणं चासौ वृत्तिश्चेत्यन्तःकरणवृत्तिः । सच्चिदाभासकर्तृरूपवृत्तिमदपेक्षया करणभूतं मनःशब्दवाच्याहमिदमात्मिका वृत्तिरिति यावत् । वृत्तिश्चेति चकारेण छायाहङ्कारैक्यविषये प्रदर्शितो दृष्टान्तादिरवस्थात्रयेऽप्यहङ्कारवत्सङ्कोचविकासादिश्चात्रापि समान इति द्योत्यते । उक्तलक्षणा सा वृत्तिश्च सुषुप्तौ लीयते । सा पुनः सूक्ष्मभोगप्रदकर्मवशादुत्पत्तिसमये चिच्छायया तप्तायःपिण्डवदैक्यं प्राप्ता सती स्वप्नावस्थायां नाडीमध्ये कर्तृकरणकर्मक्रियात्मकव्यवहारवासनाः कल्पयेत् । सैव पुनः स्थूलभोगप्रदकर्मवशात्स्थूलशरीरेणैक्यं प्राप्ता सती जाग्रदवस्थायां श्रोत्रादीन्द्रियैः शब्दादिविषयान्बहिः कल्पयेत् । ननु बाह्यविषयाणामीश्वरस्रष्टृत्वेनान्तःकरणकल्पितत्वमयुक्तमिति चेन्नैष दोषः, स्वरूपमात्रस्येश्वरस्रष्टृत्वेऽपि भोग्यत्वाकारस्यान्तःकरणकल्पितत्वात् । "करणं कर्म कर्त्ता च क्रिया स्वप्ने फलं च धीः । जाग्रत्येवं यतो दृष्टे" त्याचार्यवचनाच्च ॥ ११ ॥

एकमेवान्तःकरणं व्यवहारसौकर्यार्थमहङ्कारमनोभेदेनावयवशो विभज्य प्रदर्शयित्वा इदानीमहङ्कारस्यापि मनोपेक्षया कर्तृरूपत्वेऽपि चिच्छायावेशतो बुद्धौ भानमित्यत्र बुद्धिशब्देन निर्दिष्टान्तःकरणाख्यद्रव्यापेक्षया करणत्वात्तस्यैव सर्वसंसारनिर्वर्तकत्वेन मुख्यकर्तृत्वान्मुख्याहङ्कारत्वाच्चाहङ्कारमनोविभागपूर्वावस्थालक्षणस्य तस्यान्तःकरणाख्यद्रव्यस्य स्वरूपं दर्शयति—

मनोहङ्कृत्युपादानं लिङ्गमेकं जडात्मकम् ।
अवस्थात्रयमन्वेति जायते म्रियते तथा ॥ १२ ॥

मन इति ॥ मनोहङ्कृत्योरुपादानं कारणं यत्तन्मनोहङ्कृत्युपादानं किं तल्लिङ्गं, लिङ्ग्यते गम्यतेऽनेनेति लिङ्ग-

मन्तःकरणाख्यं द्रव्यमित्यर्थः । तस्यैवाहं ब्रह्मास्मीत्यखण्डाकारवृत्तिद्वारेण सच्चिदानन्दाद्वितीयब्रह्मात्मगमकत्वात् । ननु तत्त्वविवेकाख्ये ग्रन्थे "बुद्धिकर्मेन्द्रियप्राणपञ्चकैर्मनसा धिया शरीरं सप्तदशभिः सूक्ष्मं तल्लिङ्गमुच्यते" इति सप्तदशावयवात्मकस्य सूक्ष्मशरीरस्यैव लिङ्गत्वमुक्तं, नान्तःकरणस्य लिङ्गत्वमुपपद्यते इत्याशङ्क्य बुद्धिकर्मेन्द्रियप्राणपञ्चकानां वेदान्तेषु भौतिकत्वेन श्रुतत्वेऽपि "अन्यत्रमना अभूवं नादर्शंमन्यत्रमना अभूवं नाश्रौष" मित्यादिश्रुतिष्वन्तःकरणाधीनत्वश्रवणात् अतएवाहङ्कारमनःसहितानां तेषां ज्ञानक्रियाशक्तिद्वयात्मकान्तःकरणवृत्तित्वाद्वृत्तिवृत्तिमतोर्व्यावहारिकभेद - विवक्षया तत्रोक्तत्वात् । तयोः पारमार्थिकभेदविवक्षयैवात्रोक्तत्वात्तद्विवक्षाभेदेन पक्षद्वयस्याप्युपपन्नत्वादुक्तलक्षणस्यान्तःकरणस्य सूक्ष्मशरीरत्वं लिङ्गत्वं चोपपद्यते एवेत्यभिप्रायेणाह एकमिति । एवमुक्तलक्षणमन्तःकरणं स्वभावतो जडमप्यनुप्रविष्टचिच्छायाबलेनैव स्थूलशरीरमप्यात्मत्वेनैव गृहीत्वा पूर्वोक्तसङ्कोचविकासप्रकारेणानुदिनमवस्थात्रयं प्राप्नोति । यथा कर्मवशादवस्थात्रयं प्राप्नोति तथा जननमरणादिकञ्च कर्मवशात्प्राप्नोतीत्यर्थः । जायते म्रियते इत्युक्ताऽनन्तरं तथाशब्दप्रयोक्तुर्धर्माधर्मवशाद् घटीयन्त्रवत्पौनःपुन्येन जन्ममरणे प्राप्नोतीत्यभिप्रायः "शोकहर्षभयक्रोधलोभमोहस्पृहादयः अहङ्कारस्य दृश्यन्ते जन्ममृत्युश्च नात्मनः । एवं दुःखाद्यनुभवन्संसारेऽस्मिन्पुमान् मुने घटीयन्त्रवदुद्विग्नो जायते म्रियते च सः" इत्यादिपुराणवचनात् ।। १२ ।।

एवं निखिलसंसारनिर्वाहकलिङ्गशरीरस्वरूपं निरूप्य- इदानीमस्य लिङ्गस्य विराडन्तसमस्तप्रपञ्चस्य मूलकारणभूतायाः सच्चिदानन्दब्रह्माश्रयाया अविद्याऽज्ञानतमोमोहादिशब्दवाच्यायाः सर्वानर्थबीजभूतायाः अनिर्वचनीयायाः मायायाः स्वरूपं तच्छक्तिद्वारेण विभज्य दर्शयितुं तच्छक्तेरियत्तां तावद्दर्शयति—

शक्तिद्वयं हि मायाया विक्षेपावृत्तिरूपकम् ।
विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत्सृजेत् ।। १३ ।।

शक्तिद्वयमिति ।। उक्तलक्षणमायाया आवरणशक्तिर्विक्षेपशक्तिरिति द्वयमस्तीति शेषः । "जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवती" त्यादिवेदान्तवाक्येषु मायायाः शक्तिद्वयात्मकं प्रसिद्धमिति, शास्त्रप्रसिद्धिं द्योतयति हिशब्दः । अधिष्ठानमनाच्छाद्य विक्षेपयितुमशक्यत्वेन विक्षेपशक्तेः आवरणशक्तिपूर्वकत्वात्, अत एवावरणशक्तेरग्र्यत्वेऽपि छन्दोभङ्गभयाद्विक्षेपशब्दपूर्वनिपातः कृतः । एवं शक्तेरियत्तामुक्त्वा, इदानीं सच्चिदानन्दलक्षणब्रह्मात्मस्वरूपमात्राच्छादिकायाः विक्षेपशक्त्यभिव्यक्तेः पूर्वावस्थालक्षणायाः आवरणशक्तेः सर्वानर्थबीजत्वेनाग्र्यत्वेऽपि विक्षेपशक्तेर्नैरपेक्ष्येण ब्रह्मानन्दानुभवं तिरस्कृत्य सांसारिकसुखदुःखादिभोगप्रदत्वसामर्थ्याभावात्प्रतिदिनं सुषुप्तावनुभूतत्वेनास्मिन्नर्थे कस्यापि विप्रतिपत्त्यसम्भवात् विक्षेपशक्त्यभिव्यक्त्यनन्तरं तया सृष्टस्याहङ्कारादिदेहान्तस्य युष्मदर्थस्य शरीरत्रयविलक्षणस्य कूटस्थासङ्गबोधरूपस्य साक्षिणश्च स्वभाव-

सिद्धं भेदं सैवावरणशक्तिर्येनांशेनावृणोति तस्यैवांशस्य सुखित्वदुःखित्वाद्यनेकविधसंसारकारणत्वात्तादृशावरणशक्त्यंशस्योक्तरीत्या विक्षेपशक्त्यनन्तरभावित्वात्तदपेक्षया विक्षेपशक्तेरग्रचत्वादनेनैवाभिप्रायेणावरणशक्तिस्वरूपं पश्चान्निरूपयिष्यन्विक्षेपशक्तिस्वरूपं तावन्निरूपयति। विविधं करणं विक्षेपः विविधं भानं भवनं वा सा चासौ शक्तिश्चेति विक्षेपशक्तिः। अध्यात्मं विश्वतैजसप्राज्ञादिभेदेन, अधिदैवतं विराट् हिरण्यगर्भान्तिर्याम्यादिभेदेन च स्वगतादिभेदरहितं चिन्मात्रं विक्षेपयतीति विक्षेपशक्तिः, उक्तलक्षणं चिन्मात्रमनया विक्षिप्यते इति वा गिरिनदीसमुद्राद्यनेकनामरूपाकारेण स्वयमेव विक्षिपति, नामरूपाद्याकारेण परिणमते विवर्तते इत्यर्थः। एवमिति विक्षेपशक्तिर्जायते, पुनर्लयं गच्छतीति जगत्। उक्तलक्षणा सा शक्तिरुक्तलक्षणं समष्टिव्यष्टचात्मकं लिङ्गशरीरादिब्रह्माण्डान्तं जगत्सृजेदुत्पादयेदित्यर्थः ॥ १३ ॥

एवं विक्षेपशक्तिस्वरूपं निरूप्य तद्विक्रियात्मकसृष्टिस्वरूपनिरूपणद्वारेणापि तदेव विशदयति —

सृष्टिर्नाम ब्रह्मरूपे सच्चिदानन्दवस्तुनि ।
अब्धौ फेनादिवत्सर्वनामरूपप्रसारणा ॥ १४ ॥

सृष्टिरिति ॥ ब्रह्मस्वरूपे सच्चिदानन्दवस्तुन्यारोपितनामरूपयोरवस्तुत्वादधिष्ठानस्य तद्वैलक्षण्यं द्योतयति वस्तुशब्दः। सच्चिदानन्दश्च तद्वस्तु चेति सच्चिदानन्दवस्तु तस्मिन्परमार्थसच्चिदानन्दलक्षणे ब्रह्मणीत्यर्थः। नाम च रूपञ्च

नामरूपे सर्वे च ते नामरूपे च तयोः प्रसारणा, विस्तारः विततिः सृष्टिरित्युच्यते। एतदुक्तं भवति। ब्रह्मण्यवस्थितायाः विक्षेपात्मिकायाः मायायास्तस्मिन्नेव ब्रह्मणि समस्तनामरूपाकारेण विवर्तनं यत्सैव सृष्टिरित्युच्यते इत्यत्र दृष्टान्तमाह— अब्धौ फेनादिवदब्धाववस्थितायाः विक्षेपात्मिकायाः मायायास्तत्रैव फेनतरङ्गबुद्बुदाद्याकारेण विवर्तनं यथा सृष्टिशब्देनोच्यते तथाऽत्रापीति भावः ॥ १४ ॥

एवं विक्षेपशक्तिद्वारा मायास्वरूपं दर्शयित्वा आवरणशक्तिद्वारेणापि तदेव दर्शयति—

अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः ।
आवृणोत्यपरा शक्तिः सा संसारस्य कारणम् ॥ १५ ॥

अन्तरिति॥ अन्तः स्थूलशरीरस्यान्तर्देशे। दृग्दृश्ययोर्भेदम् "अहमन्नादोऽहमन्नाद" इत्यादि श्रुत्यानुसारेण शरीरत्रयतादात्म्यवशाद्भोक्तृत्वमापन्नस्य परमार्थतस्तद्रहितस्य केवलदृङ्मात्रस्वरूपस्यास्मदर्थस्य साक्षिणः, अविद्याकार्यत्वेन जडरूपस्याहङ्कारादिदेहान्तस्य युष्मदर्थस्य च भेदमन्योन्यवैलक्षण्यमन्योन्यपृथग्भावम्। बहिः शरीरस्य बाह्यदेशे। ब्रह्मसर्गयोर्भेदं "सच्चासच्चाभवत् अहमन्नमहमन्न"मित्यादिश्रुत्यनुसारेण नामरूपतादात्म्यवशाद्भोग्यत्वमापन्नस्य परमार्थतस्तद्रहितस्य परब्रह्मणस्तस्मिन् शुक्तिकायां रजतवदध्यस्तनामरूपात्मकस्य सर्गस्य च भेदम्। एवमन्तरुक्तलक्षणयोर्दृग्दृश्ययोर्भेदं, बहिर्ब्रह्मसर्गयोर्भेदं चापरा शक्तिः। पूर्वोक्तरीत्या विक्षेपशक्त्यन-

न्तरभावित्वेऽपि स्वरूपतो विक्षेपशक्तिप्रवर्तकत्वेन तत्कारणभूता आवरणवाच्या मायाशक्तिरावृणोत्याच्छादयति । सा संसारस्य कारणम्, अन्तर्दृक्स्वरूपस्य साक्षिणः कर्तृत्वभोक्तृत्वादिलक्षणस्य संसारस्य सैव कारणं, तस्या एवान्योन्याध्यासहेतुत्वेन सर्वानर्थकारित्वादिति भावः । बहिः सच्चिदानन्दलक्षणस्य ब्रह्मणः भोग्यत्वादिविकारस्यापि सैवकारणमित्यर्थाल्लभ्यते, भोक्तृत्वस्य भोग्यापेक्षत्वात् ।। १५ ।।

एवं शक्तिद्वयात्मकं मायास्वरूपं प्रदृश्य, इदानीं प्रक्रान्तानुसारेण मनोहंकृत्युपादानमित्यस्मिन्श्लोके सामान्यतो दर्शितं लिङ्गस्वरूपं विशेषतः प्रदर्शयति—

साक्षिणः पुरतो भातं लिङ्गं देहेन संयुतम् ।
चितिच्छायासमावेशाज्जीवः स्याद्व्यावहारिकः ।।१६।।

साक्षिण इति ।। चितिच्छायासमावेशादनुप्रविष्टचैतन्यस्य बलात् । साक्षिणः प्रत्यगात्मनः । पुरतोऽग्रतः कर्मत्वेनेति यावत् । भातं भासमानं । देहेन संयुतं स्थूलशरीरेणैक्यं प्राप्तं । लिङ्गं पूर्वोक्तलक्षणं लिङ्गशरीरं । जीवः स्यात् व्यावहारिकः लोकद्वयेऽपि प्रमातृत्वादिसमस्तव्यवहारनिर्वाहकत्वात्व्यावहारिकाख्यो जीवः स्यात् । अस्यानिर्वचनीयमायाकार्यत्वेन प्रकृतिलक्षणविकारित्वात्सकलसंसारनिर्वाहकत्वात्सच्चिदानन्दब्रह्मात्मैक्यस्वरूपावस्थानलक्षणमोक्षदशायां अभावाच्च व्यावहारिकजीव इत्युक्तम् ।। १६ ।।

ननु व्यावहारिकजीवस्य सकलसंसारनिर्वाहकत्वेऽपि मिथ्याभूतत्वान्नित्यमुक्तस्य साक्षिणः संसाराभावाच्चोभयोरपि

मोक्षानधिकारादन्यस्य कस्यचिदधिकारिणोऽभावाच्च मोक्षशास्त्रवैयर्थ्यं स्यादित्यत आह—

अस्य जीवत्वमारोपात्साक्षिण्यप्यवभासते ।
आवृत्तौ तु विनष्टायां भेदे भातेऽपयाति तत् ।। १७ ।।

अस्येति ।। अस्य व्यावहारिकजीवस्य । जीवत्वं जीवभावः । आरोपादावरणशक्तिकृतादन्योन्याध्यासात् साक्षिण्यपि दृग्रूपे प्रत्यगात्मन्यपि जीवत्वं । साक्षिणि प्रत्यगात्मनि परमार्थतो जीवत्वासम्भवं द्योतयति अपिशब्दः । अवभासते प्रकाशते स्वरूपचैतन्यावगतित्वेन भासते इति भावः । तुशब्दोऽवधारणे । आवृत्तौ असत्त्वावृत्तिरूपेणाभानावृत्तिरूपेण च द्विप्रकारमायावरणशक्तौ, अहं ब्रह्मास्मीत्यखण्डैकरसब्रह्मात्मसाक्षात्कारेण । विनष्टायां विशेषेणनष्टायां सत्यां, पुनर्भ्रान्त्यनुदयः नाशस्य विशेषः, आत्यन्तिकनाशं प्राप्तायामित्यर्थः । भेदे भाते व्यावहारिकजीवस्वरूपस्य लिङ्गशरीरस्य घटादिवत् दृश्यत्वं, प्रत्यग्बोधस्वरूपस्य साक्ष्याख्यस्य स्वस्य दृष्टत्वञ्च भेदस्तस्मिन् सम्यक् प्रकाशिते सति, साक्षिण्यारोपितं तज्जीवत्वं । अपयाति अपगच्छत्येवेत्यत्र तुशब्दः सम्बध्यते । यस्मादेवं तस्माच्छास्त्रवैयर्थ्यं न स्यादित्यभिप्रायः।।

यथा व्यावहारिकजीवगतं जीवत्वं आरोपात्साक्षिण्यप्यवभासते तथा नामरूपात्मकः सर्गगतो विकारः आरोपाद्ब्रह्मण्यप्यवभासते इत्याह—

तथा सर्गब्रह्मणोश्च भेदमावृत्य तिष्ठति ।
या शक्तिस्तद्वशाद्ब्रह्म विकृतत्वेन भासते ।। १८ ।।

तथेति ।। यथा अन्तः दृग्दृश्ययोर्भेदमाच्छादयति तथा सर्गब्रह्मणोर्भेदं चावृत्य या आवरणशक्तिस्तिष्ठति, तद्वशात्तदावरणशक्तिकृतादन्योन्याध्यासवशात् । ब्रह्म सच्चिदानन्दलक्षणः परमात्मा । विकृतत्वेन भासते, स्वयं कूटस्थमपि षड्भावविकारशून्यमपि तद्वत्त्वेन भासते इत्यर्थः ।। १८ ।।

बाह्येऽप्यावृत्तिनाशेन सर्गब्रह्मभेदस्फुरणात् ब्रह्मण्यारोपितो विकारो निवर्तते इत्याह—

अत्राप्यावृत्तिनाशेन विभाति ब्रह्मसर्गयोः ।
भेदस्तयोर्विकारं स्यात्सर्गे न ब्रह्मणि क्वचित् ।। १९ ।।

अत्रेति ।। अत्रापि यथान्तस्तथा बाह्येऽपि । आवृत्तिनाशेन अन्वयव्यतिरेकाभ्यामन्तर्बहिश्च पदार्थद्वयपरिशोधनपूर्वकेण अहं ब्रह्मास्मीत्यभिव्यक्तेन सच्चिदानन्दलक्षणब्रह्मात्मबोधेन उक्तलक्षणायामावरणशक्तौ वासनया सह विनष्टायां सत्यां तेनावृत्तिनाशेन । ब्रह्मसर्गयोर्भेदो विभाति घटपटयोरिव भेदः सम्यक् प्रकाशते । एवं भेदे भाते सति तयोर्ब्रह्मसर्गयोर्मध्ये नामरूपात्मके सर्गे एव जन्मादिविकारः स्यात् । न ब्रह्मणि क्वचित् आनन्दलक्षणे ब्रह्मण्येकदेशेऽपि विकारो न स्यादित्यर्थः ।। १९ ।।

एवमन्तर्बहिश्च आवृत्तिकार्यतादात्म्यवशात्साक्षिब्रह्मणो भोक्तृत्वभोग्यत्वादिरूपविकारं तदावृत्तिनाशेन तत्कृतविकारनिवृत्तिञ्च दर्शयित्वा, इदानीं ब्रह्मणः सर्वात्मकत्वप्रदर्शनद्वारेण त्वंपदार्थमप्यर्थाद्विवेचयन्मुखतस्तत्पदार्थं विविनक्ति—

अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ।। २० ।।

अस्तीति ।। अस्ति विद्यते, भाति प्रकाशते, प्रियं प्रेमास्पदं, रूपं जगद्रूपं पृथुबुध्नोदरोतप्रोतादिकं, नाम घटः पट इत्यादिकमेतत्सर्वं मिलित्वांशपञ्चकम् । इदमेकं वस्तु अस्तीदं भातीदं प्रियमिदमस्य स्वरूपमिदमस्य नामेत्येतदंशपञ्चकव्यतिरेकेण व्यवहारासंभवाल्लोकव्यवहारगोचरभूतं भौतिकात्मकं समस्तं वस्त्वपि सच्चिदानन्दरूपं नाम लक्षणांशपञ्चात्मकमेव भवतीति यावत् । अंशपञ्चकसमुच्चयार्थश्चशब्दः । एतेष्वंशेषु मध्ये आद्यत्रयं सच्चिदानन्दात्मकमंशत्रयं । ब्रह्मरूपं ब्रह्मस्वरूपम् । ततो द्वयं तस्मात्सच्चिदानन्दात्मकांशत्रयादुपरितनं नाम रूपात्मकमंशद्वयं जगद्रूपमित्यर्थः ।। २० ।।

उक्तमेवार्थमन्वयव्यतिरेकाभ्यां स्पष्टयति—

खवाय्वग्निजलोर्वीषु देवतिर्यङ्नरादिषु ।
अभिन्नाः सच्चिदानन्दा भिद्येते रूपनामनी ।। २१ ।।

खमिति ।। आकाशवायुतेजोम्ब्वन्नाख्येषु पञ्चभूतेषु देवतिर्यङ्नरादिभेदभिन्नेषु शरीरलक्षणेषु भौतिकेषु वर्तमानाः सच्चिदानन्दास्त्रयोऽप्यंशा अभिन्ना निर्विशेषाः स्युः; घटोऽस्ति, पटोऽस्ति, घटो भाति, पटो भाति, घटः प्रियः, पटः प्रिय इति सर्वत्रानुवृत्तस्वभावत्वात् । रूपनामनी भौतिकेषु च वर्तमानौ रूपनामात्मकौ उभावप्यंशौ भिद्येते, ईदृग्रूपस्ता-

दृग्रूपो घटः पट इत्यादिभेदभिन्नत्वेन वर्तते, अनिर्वचनीयमाया-कार्यत्वेन व्यावृत्तस्वभावत्वात् ॥ २१ ॥

एवं प्राक्तनग्रन्थसन्दर्भेणान्वयव्यतिरेकाभ्यां पदार्थद्वयं परिशोध्य, इदानीं नामरूपोपेक्षापुरःसरं सच्चिदानन्दतत्परो भूत्वा, वाक्यश्रवणाङ्गत्वेन वाक्यार्थज्ञानसाधनभूतं वक्ष्यमाण-भेदभिन्नं समाधिं हृदये वा बाह्ये वा निरन्तरं कुर्यादित्याह—

उपेक्ष्य नामरूपे द्वे सच्चिदानन्दतत्परः ।
समाधिं सर्वदा कुर्याद्धृदये वाऽथ वा बहिः ॥ २२ ॥

उपेक्ष्येति ॥ जगद्रूपे नामरूपे द्वे । उपेक्ष्यावज्ञाय उदासीनीकृत्य । सच्चिदानन्दतत्परः सच्चिदानन्दरूपब्रह्मात्मन्येव तात्पर्यवान्, तदेकचित्त इत्यर्थः । तादृशो भूत्वा समाधिं वक्ष्यमाणं चित्तसमाधानं सर्वेन्द्रियाण्यपि हृदयकमले निरुध्य तत्रतत्र वागादीन्द्रियाणां स्वस्वगोलकावस्थानेऽपि तेषां वृत्तिमात्रं निरुध्य, शरीरादन्तर्बाह्यदेशे वा वक्ष्यमाणप्रकारेण निरन्तरं कुर्यादित्यर्थः । विधिमुखतः समाधिं विधायानेन श्लोकेन प्रतिपादितं पदं प्रति परमहंसस्यैव ब्रह्मज्ञानाधिकारो नान्यस्येत्यर्थादुच्यते । एतत् श्लोकार्थानुष्ठानस्यान्यस्मिन्नसम्भवात्परमहंसस्यैव सम्भवाच्च ॥ २२ ॥

एवं ब्रह्मजिज्ञासुं मुमुक्षुं प्रति निदिध्यासितव्य इत्येतद्वाक्यानुसारेणावश्यकर्तव्यत्वेन समाधिं विधाय, इदानीं तस्य समाधेरवान्तरभेदं दर्शयन्नेतान्समाधीन् हृदये कुर्यादित्याह—

सविकल्पो निर्विकल्पः समाधिर्द्विविधो हृदि ।
दृश्यशब्दानु*विद्धेन सविकल्पः पुनर्द्विधा ॥ २३ ॥

सविकल्प इति ॥ सविकल्पसमाधिर्निर्विकल्पसमाधिरिति समाधिर्द्विविधो द्विप्रकारो भवेत् । दृश्यानुविद्धः सविकल्पकः, शब्दानुविद्धः सविकल्पक इति सविकल्पसमाधिरपि द्विप्रकारो भवेत् । एवमुक्तप्रकारेण दृश्यानुविद्धः सविकल्पकसमाधिः शब्दानुविद्धः सविकल्पकसमाधिर्निर्विकल्पकश्चेति त्रिप्रकारं समाधिं क्रमेण हृदये कुर्यादिति शेषः । दृश्यमिश्रो दृश्यानुविद्धः शब्दमिश्रः शब्दानुविद्धः ॥ २३ ॥

सविकल्पो निर्विकल्पश्चेति सविकल्पस्य प्रथमोद्दिष्टत्वात्तत्रापि दृश्यशब्दानुविद्धेनेति दृश्यानुविद्धस्यैव प्रथमोद्दिष्टत्वादन्तर्दृग्दृश्यविवेकं दृगेकनिष्ठं दृश्यानुविद्धं सविकल्पसमाधिं तावद्दर्शयति—

कामाद्याश्चित्तगा दृश्यास्तत्साक्षित्वेन चेतनम् ।
ध्यायेद् दृश्यानुविद्धोऽयं समाधिः सविकल्पकः ॥ २४॥

कामाद्या इति ॥ कामाद्याः कामसङ्कल्पादयः पूर्वोक्ताश्चित्तगाः अन्तःकरणवृत्तित्वेनान्तःकरणनिष्ठाः । दृश्याः कर्मभूताः युष्मत्प्रत्ययविषयाः भवन्तीति शेषः । तत्साक्षित्वेन तेषां कामादिचित्तगतदृश्यानां प्रकाशकत्वेन । चेतनमात्मानं प्रत्यक्चैतन्यं ध्यायेत् । एतदुक्तं भवति तेषां

*दृश्यशब्दानुबेधेनेति वा पाठः ।

कामादीनां मध्ये एकमेकं प्रतियोगिनं कृत्वा अस्य कामस्य यत्साक्षिभूतं चैतन्यं तदेव मम यथार्थं स्वरूपमित्येवं निरन्तरं प्रत्यग्रूपं चिन्मात्रं भावयेदिति । एवमुक्तप्रकारेण चिन्मात्रे भाविते सत्ययं दृश्यानुविद्धः सविकल्पकसमाधिरित्युच्यते इति शेषः । "नर्ते स्याद्विक्रियां दुःखी साक्षिता का विकारिणः । धीविक्रियासहस्राणां साक्ष्यतोऽहमविक्रिय" इति नैष्कर्म्यसिद्धिकारैरुक्तत्वात् ॥ २४ ॥

एवं दृश्यप्रतियोगिकं सविकल्पकसमाधिं दर्शयित्वा इदानीं क्रमप्राप्तं कामाद्यशेषदृश्यविलापकं साक्षिनिष्ठं शब्दानुविद्धसविकल्पकसमाधिं दर्शयति—

असङ्गः सच्चिदानन्दः स्वप्रभो द्वैतवर्जितः ।
अस्मीतिशब्दविद्धोऽयं समाधिः सविकल्पकः ॥ २५ ॥

असङ्गः इति ॥ असङ्गः सङ्गरहितः । "असङ्गो ह्ययं पुरुष" इति श्रुतेः । सच्चिदानन्दः सत्यज्ञानानन्दस्वरूपः । "सत्यं ज्ञानमनन्तं ब्रह्म, विज्ञानमानन्दं ब्रह्मे"त्यादिश्रुतेः । स्वप्रभः स्वयंप्रकाशः । अदृष्टं द्रष्टश्रुतं श्रोतृ "न द्रष्टेर्द्रष्टारं पश्ये"दित्यादिश्रुतेः । द्वैतवर्जितः प्रकाश्यस्य प्रकाशाभिन्नत्वेन कामाद्यशेषरहितः स्वगतादिभेदरहित इत्यर्थः । "एकमेवाद्वितीय"मिति श्रुतेः । एवमुक्तलक्षणः प्रत्यग्रूपो यः साक्षी अयमहमस्मीति निरन्तरं भावयेत् । एवमुक्तप्रकारेण कामाद्यशेषवृत्तिविलापकोऽसङ्गादिशब्दमात्रमिश्रितो विजातीयप्रत्ययशून्यसजातीयप्रत्ययप्रवाहलक्षणः प्रत्यक्चिन्मात्रविषयकश्चिदा-

भासनिष्ठो योऽनुभवः अयं शब्दानुविद्धः सविकल्पकसमाधिरित्युच्यते इति शेषः । "निरीहोऽस्मि निरंशोऽस्मि स्वस्थोऽस्म्यस्मि च निस्पृहः । शान्तोऽहमर्थरूपोऽस्मि चिरायाहमलं स्थित" इति वसिष्ठवचनात् ॥ २५ ॥

एवं द्विप्रकारं सविकल्पकसमाधिं दर्शयित्वा इदानीं कामादिदृश्यानामसङ्गादिशब्दानां विलापकं निवातस्थितदीपवच्चित्तनैश्चल्यात्मकं निर्विकल्पसमाधिं दर्शयति—

स्वानुभूतिरसावेशाद् दृश्यशब्दानुपेक्षितुः ।
निर्विकल्पः समाधिः स्यान्निवातस्थितदीपवत् ॥ २६ ॥

स्वानुभूतिरिति ॥ अनुभूतिर्ज्ञानं प्रत्यक्चैतन्यं । "याऽनुभूतिरजाऽमेया त्वनन्तानन्दविग्रहा । महदादिजगन्मायाचित्रभित्ति नमामि ता"मिति इष्टसिद्धिकारैरुक्तत्वात् । रस आनन्दस्वरूपः परमात्मा । "रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवती"ति श्रुतेः । प्रत्यगात्मापि रसाभिन्नत्वेन परमप्रेमास्पदत्वाद्रसस्वरूपभूता अनुभूतिः । स्वानुभूतिरेव रसस्तस्यावेशः स्वानुभूतिरसावेशः पूर्वोक्तसमाधिद्वयाभ्यासपाटवादन्तःकरणे स्वरूपभूतज्ञानानन्दाविर्भावः स्वानुभूतिरसावेश इत्युच्यते । यद्वा आवेशोऽभिनिवेशः मग्नत्वं स्वानुभूतिरसावेशः । यद्वा आसमन्तात्प्रवेशः आवेशः स्वरूपज्ञानानन्दपूर्णत्वं । यद्वा देवताद्यावेशवत् स्वानुभूतिरसस्यावेशस्तस्मात्स्वानुभूतिरसावेशात् । स्वानुभूतिरसास्वादादिति पाठे, चिदानन्दस्वरूपोऽहमिति स्वानुभतिरसस्यात्मत्वेन स्वीकरणं स्वानुभूति-

रसास्वादस्तस्मात् । दृश्यशब्दानुपेक्षितुः पूर्वोक्तान्कामादिदृश्यानसङ्गादिशब्दांश्चोपेक्षितुरुदासीनकर्तुरुभयत्र तात्पर्यराहित्येन तूष्णीं स्थितस्य देवताद्याविष्टवत्स्वानुभूतिरसाख्यमहाग्रहग्रस्तत्वेन स्वातन्त्र्याभात्परतन्त्रतया स्थितस्येति तात्पर्यार्थः । निर्विकल्पकसमाधिः स्यात् । "प्रशान्तवृत्तिकं चित्तं परमानन्ददीपकम् । असंप्रज्ञातनामायं समाधिर्योगिनां प्रिय" इति । उक्तलक्षणो निर्विकल्पकसमाधिरुक्तलक्षणस्याधिकारिणः स्वयमेव स्यात् । लयविक्षेपकषायादिप्रतिबन्धाभावादसंप्रज्ञाताख्यो निर्विकल्पकसमाधिः स्वयमेव भवतीत्यर्थः । तस्मिन्समाधौ चित्तनैश्चल्ये दृष्टान्तमाह निवातस्थितदीपवदिति । निवातस्थले स्थापितो दीपो यथा निश्चलो भवति तथा समप्राप्तचित्तमपि निश्चलं भवतीत्यर्थः । "तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यं तीव्रसंवेगानामासन्नः समाधिलाभः व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधलक्षणचित्तान्वयो निरोधपरिणाम" इति पतञ्जलिना सूत्रितत्वात् । "यथा दीपो निवातस्थो नेङ्गते सोमपा स्मृता । योगिनो यतचित्तस्य युञ्जतो योगमात्मन" इत्यादि भगवद्वचनात् । "अन्तःशून्यो बहिः शून्यः शून्यकुम्भ इवाम्बरे । अन्तः पूर्णो बहिः पूर्णः पूर्णकुम्भ इवार्णवे । मा भव ग्राह्यभावात्मा ग्राहकात्मा च मा भव । भावनामखिलां त्यक्त्वा यदिष्टं तन्मयो भव । द्रष्टृदर्शनदृश्यानि त्यक्त्वा वासनया सह । दर्शनप्रथमाभ्यासमात्मानं केवलं भज । प्रशान्तसर्वसङ्कल्पा या शिलावदवस्थितिः । जाग्रन्निद्राविनिर्मुक्ता सा स्वरूपस्थितिः परे"ति वसिष्ठवचनाच्च । अस्य समाधेर्वाक्यश्रवणाङ्गकत्वं च तत्त्व-

विवेकाख्ये ग्रन्थे श्रीमद्विद्यारण्यगुरुभिर्निरूपितं "अमुना वासनजाले निःशेषं प्रविलापिते । समूलोन्मूलिते पुण्यपापाख्ये कर्मसञ्चये । वाक्यमप्रतिबद्धं सत्प्राक्परोक्षावभासिते । करामलकवद्बोधमपरोक्षं प्रसूयते" इति ।। २६ ।।

एवं हृदयसम्बन्धित्वेन दर्शितं त्रिप्रकारमिमं समाधिं बाह्यसम्बन्धित्वेनापि दिदर्शयिषुर्बहिर्ब्रह्मसर्गविवेकं सच्चिदानन्दलक्षणब्रह्मनिष्ठं दृश्यानुविद्धसमाधिं तावद्दर्शयति—

हृदीव बाह्यदेशेऽपि यस्मिन् कस्मिंश्च वस्तुनि ।
समाधिराद्यः सन्मात्रान्नामरूपपृथक् कृतिः ।। २७ ।।

हृदीति ।। यथा हृदये साक्षिणः सकाशात्कामादीनां पृथक्करणमाद्यः समाधिः । एतदुक्तं भवति, यथा हृदि कामादीनां मध्ये एकमेकं प्रतियोगिनं कृत्वा स्वात्मनः सकाशात् नामरूपयोः पृथक्करणम् । अस्य साक्षिभूतं यच्चैतन्यं तदेवाहमस्मि । अस्य संकल्पस्य साक्षिभूतं यच्चैतन्यं तदेवाहमस्मीत्यनुचिन्तनं दृश्यानुविद्धसमाधिरित्युच्यते, तथा बाह्येऽपि स्वाभीष्टमेकं वस्त्ववलम्ब्यांशपञ्चके तस्मिन्वस्तुनि वर्तमानात्सच्चिदानन्दलक्षणब्रह्मणः सकाशान्नामरूपे पृथक्कृत्याऽनयोः पृथक्कृतयोर्नामरूपयोरधिष्ठानभूतं सच्चिदानन्दलक्षणं यद्वस्तु तदेव तत्पदलक्ष्यं ब्रह्मेत्यनुचिन्तनं दृश्यानुविद्धसमाधिरित्युच्यते इति । "यत्र स्थितेयं विश्वश्रीः प्रतिभामात्ररूपिणी । रज्ज्वां भुजङ्गवद्भाति सोऽहमात्मा सदोदित" इत्यादिवसिष्ठवचनाच्च ।। २७ ।।

एवं दृश्यानुविद्धसमाधिं निरूप्य इदानीं समष्टिव्यष्ट्यात्मकसमस्तदृश्यप्रपञ्चविलापकं शब्दानुविद्धसमाधिं निरूपयति—

अखण्डैकरसं वस्तु सच्चिदानन्दलक्षणम् ।
इत्यविच्छिन्नचिन्तेयं समाधिर्मध्यमो भवेत् ॥ २८ ॥

अखण्डैकरसमिति ॥ अखण्डं देशकालाद्यपरिच्छिन्नं । स्वगतादिभेदरहितमिति यावत्। 'एकमेवाद्वितीयमि''ति श्रुतेः। ''न व्यापित्वाद्देशतोऽन्तो, नित्यत्वान्नापि कालतः, न वस्तुतोऽपि सार्वात्म्यादानन्त्यं ब्रह्मणि त्रिधे''त्येतत्तैरेव पञ्चकोशविवेकाख्ये ग्रन्थे उपपत्तिभिरखण्डत्वस्य समर्थितत्वाच्च । एकरसं कालत्रयेऽप्येकरूपं कूटस्थमित्यर्थः । ''अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते'' इति भगवद्वचनात् । अखण्डञ्च तदेकरसं चेत्यखण्डैकरसं। सच्चिदानन्दलक्षणं स्पष्टोऽर्थः। एवमुक्तलक्षणं यद्वस्तु तदेव ब्रह्मेत्यविच्छिन्नचिन्ता । विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहरूपा या चिन्तेयं मध्यमः समाधिर्भवेत्।शब्दानुविद्धसविकल्पकसमाधिर्भवेदित्यर्थः। 'एवं ब्रह्म चिदाकाशं सर्वात्मकमखण्डितम्।''नीरन्ध्रभूरिवाशेषमिति भावय राघव । नाहं न चान्यद्वाऽस्तीति ब्रह्मैवास्मि निरन्तरम् । आनन्दपूर्णः सर्वत्राप्यनुद्वेगादुपास्यता''मिति वसिष्ठवचनात् ॥ २८ ॥

एवं ब्रह्मविषयं द्विप्रकारं सविकल्पकसमाधिं निरूप्य, इदानीं पूर्वोक्तसमस्तदृश्यशब्दविलापकनिर्विकल्पसमाधिप्रद-

र्शनपूर्वकमुक्तलक्षणैरेतैः षड्भिः समाधिभिर्निरन्तरं कालं नयेदित्याह—

स्तब्धीभावो रसास्वादात्तृतीयः पूर्ववन्मतः ।
एतैः समाधिभिः षड्भिर्नयेत्कालं निरन्तरम् ॥ २९ ॥

स्तब्धीभाव इति ॥ रसशब्दो व्याख्यातः । आन्तरस्य त्रिप्रकारस्य समाधेर्विषयभूतस्य साक्षिणः साक्षित्वसिद्ध्यर्थं ब्रह्माभिन्नत्वं बलादङ्गीकर्तव्यम्, अन्यथा समाध्यवलम्बाभावाद्बाह्यस्य त्रिप्रकारस्य समाधेर्विषयभूतस्य ब्रह्मणोऽपि सर्वात्मकत्वसिद्ध्यर्थम् आत्माभिन्नत्वं बलादङ्गीकर्तव्यम् । एवं ब्रह्मणः सर्वात्मकत्वे सिद्धे सति स्वस्यापि रसरूपे अस्मिन्परे ब्रह्मण्यन्तःपातित्वेन स्वस्यापि रसरूपस्वीकारो रसास्वाद इत्युच्यते । तस्माद्रसास्वादादपूर्वोक्तान्तरनिर्विकल्पकसमाधिवदत्रापि द्विप्रकारसविकल्पकसमाध्यभ्यासपाटवेन भूमानन्दास्वादाद्व्यष्टिसमष्ट्यात्मकसमस्तदृश्यप्रपञ्चं, अखण्डैकरसादिशब्दजातं चोपेक्ष्यास्वादितभूमानन्दपरतन्त्रत्वेन अवस्थितस्य चित्तस्य निवातस्थले स्थापितदीपस्येव यः स्तब्धीभावो निश्चलत्वं स एव तृतीयो मतो निर्विकल्पकसमाधिरित्यभिप्रेतो विद्वद्भिरिति शेषः । निर्विकल्पकसमाधेरान्तरबाह्यमात्रविशिष्टविशेषभावात्पूर्वोक्तवचनान्येवात्रापि प्रमाणानि। एवमुक्तलक्षणैरेतैः षड्भिःसमाधिभिरेव मुमुक्षुर्निरन्तरं कालं नयेत् । कालमित्यनेन समाधीनां दीर्घकालकर्तव्यत्वं द्योत्यते । तत्रापि नैरन्तर्येण कर्तव्यत्वं निरन्तरशब्देनोच्यते । कालनिरन्तरशब्दौ सत्कारस्याप्युपलक्षकौ । ''दीर्घकालनैरन्तर्यसत्कारसेवितो दृढभूमि''रिति पतञ्जलिना सूत्रितत्वात् ॥ २९ ॥

एवमन्तर्बहिश्च मिलित्वा षड्विधान्समाधीन् दीर्घकालनैरन्तर्यसत्कारपूर्वकं मुमुक्षोरवश्यङ्कर्तव्यत्वेन विधाय, इदानीं पूर्वोक्तप्रकारेणान्वयव्यतिरेकाभ्यामन्तर्बहिश्च पदार्थद्वयपरिशोधनेन देहाभिमाने गलिते, परमात्मनि च विज्ञाते सत्युक्तलक्षणाः षड्विधाः समाधयश्च अन्तर्बहिर्वा यत्र यत्र मनो गच्छति तत्र तत्र स्वयमेव प्रवर्तन्ते इत्याह—

देहाभिमाने गलिते विज्ञाते परमात्मनि ।
यत्र यत्र मनो याति तत्र तत्र समाधयः ।। ३० ।।

देहाभिमाने इति।। रूपं दृश्यमित्यारभ्यास्य जीवत्वमारोपादित्यन्तेन श्लोकपर्यन्तेन ग्रन्थेन प्रदर्शितन्यायमनुसृत्य सम्यक् कृतेनान्तर्दृग्दृश्यविवेकेनास्मदर्थे साक्ष्यात्मत्वाभिमानादहङ्कारादिदेहान्तेषु युष्मदर्थेष्वहं कर्ताऽहं मनुष्य इत्याद्यात्मत्वाभिमाने गलिते शिथिलीभूते । "अस्ति भाति प्रियं रूपं नाम च" इत्यत्र दर्शितप्रकारेण सम्यक् कृतेन बहिर्ब्रह्मसर्गविवेकेन नामरूपात्मकं समस्तमिदं जगन्मिथ्या, तदधिष्ठानभूतं सच्चिदानन्दलक्षणं ब्रह्मैव सत्यमिति । एवं परमात्मनि च विज्ञाते सत्येवमुक्तप्रकारेण गलितदेहाभिमानस्य विज्ञातपरमात्मतत्त्वस्य मुमुक्षोरन्तर्बहिर्वा यत्र यत्र मनो गच्छति तत्र तत्रोक्तलक्षणाः षडपि समाधयः स्वयमेव भवन्तीति शेषः । तीव्रवैराग्यबलात्परमहंसाश्रमस्वीकारपूर्वकं ब्रह्मसाक्षात्कारपर्यन्तं सद्गुरुसन्निधौ श्रीमच्छारीरकशास्त्रमवलम्ब्य निरन्तरं पौनःपुन्येन क्रियमाणेन तत्त्वंपदार्थविवेकेन गलितदेहाभिमानस्य विज्ञातपरमात्मतत्त्वस्य मुमुक्षोरुक्तलक्षणाः षड्विधाः समा-

Retold may be by भारतीतीर्थ

धयः स्वयमेवानायासेन प्रवर्तन्ते इत्ययमेव तात्पर्यार्थः । "आवृत्तिरसकृदुपदेशा"दिति वैयासिकसूत्रानुसारेण "अहं ब्रह्मेति वाक्यार्थबोधो यावद् दृढीभवेत् शमादिसहितस्तावदभ्यसेच्छ्रवणादिक"मित्याचार्यैरुक्तत्वात् ।। ३० ।।

वैराग्यसंन्यासादिश्रवणसाधने दीर्घकालनैरन्तर्यसत्कारसहकृतश्रवणादिज्ञानसाधने च प्रयासं दृष्ट्वा ब्रह्मात्मैक्यलक्षणस्य ज्ञानफलस्याग्निहोत्रकार्यवत्सद्यः प्राप्त्यभावं च स्वबुद्ध्या कल्पयित्वा साधनानुष्ठानादुपरतं शिष्यं प्रति फलप्रदर्शनद्वारेण साधनानुष्ठाने तं प्रवर्तयितुं तस्य विश्वासार्थं परावरदर्शनफलप्रदर्शिनीं श्रुतिमेव पठति—

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ।। ३१ ।।

भिद्यते इति ।। देहाद्बहिः सकलनामरूपात्मकेषु वस्तुषु सर्पाधाररज्जुरिव व्याप्तः सच्चिदानन्दलक्षणो यः परमात्मा स एव परशब्देनोच्यते । अन्तरहमादिदृश्यविलक्षणोऽस्मत्प्रत्ययालम्बनभूतः प्रत्यक्चिन्मात्ररूपः साक्ष्याख्यो यो जीवात्मा स एवावरशब्देनोच्यते । परश्चासौ अवरश्चेति परावरः प्रत्यगभिन्नः परमात्मा तस्मिन् । परावरस्यैव स्वयंप्रकाशत्वेनावाङ्मनसगोचरत्वमुच्यते । तच्छब्देनावाङ्मनसगोचरे ब्रह्मात्मनीत्यर्थः । यद्वा परावरविभागाधिष्ठानभूतं शुद्धचैतन्यं तच्छब्देनोच्यते । तस्मिन्पक्षे पररूपेण वाऽवररूपेण वाऽवस्थिते परमार्थतः परावरविभागरहिते स्वगतादिभेदरहिते कूटस्थे

शुद्धचैतन्ये इत्यर्थः । तस्मिन्परावरे तस्मिन्निति पक्षद्वयेऽप्येक एव फलितोऽर्थः । परावरस्यैव शुद्धचैतन्यत्वाच्छुद्धचैतन्यस्यैवावाङ्मनसगोचरत्वाच्च । तस्मादुक्तलक्षणे तस्मिन्परावरे दृष्टे सति, "त्वं वा अहमस्मि भगवो देवते अहं वा त्वमसी" ति "तुभ्यं मह्यमनन्ताय मह्यं तुभ्यं शिवात्मने । नमो देवाधिदेवाय पराय परमात्मने" इत्यादि श्रुतिस्मृत्यनुसारेणाहं ब्रह्मास्मि ब्रह्मैवाहमस्मीति व्यतिहारेणाखण्डैकरसत्वेन करतलामलकवत्साक्षात्कृते सति, अस्यैव साक्षात्कृतवतोऽधिकारिणः हृदयग्रन्थिर्भिद्यते । हृदित्यहङ्कारः अयमित्यपरोक्षरूपः साक्षी अन्योन्यतादात्म्येन तयोरुभयोरपि स्वरूपं मिलित्वा हृदयग्रन्थिरित्युच्यते । "अहङ्कारस्य कर्तृत्वं चित्यध्यस्य, तथा चितः स्फूर्तिं चाहङ्कृतौ ग्रन्थिं कुर्यान्माया तयोर्ध्रुव" मिति वचनात् हृदयशब्दवाच्यं तादात्म्यमेव, ग्रन्थिरिव ग्रन्थिः । यद्वा हृदित्यहङ्कारः अयमिति साक्षी तयोस्तादात्म्यं हृदयग्रन्थिरुच्यते । एवमुक्तलक्षण आवृत्तिरूपमायाकार्योऽयं हृदयग्रन्थिर्भिद्यते मुच्यते । च शब्देदं शब्दौ सर्वत्रानुवर्तेते । एवं हृदयग्रन्थौ भिन्ने सत्यस्य सर्वसंशयाश्छिद्यन्ते च । परमार्थतो ममैव ब्रह्मत्वमस्ति वा न वा, ब्रह्मत्वेऽपि तादृग्रूपत्वं मम साक्षात्कृतं वा न वा, साक्षात्कृतेऽपीतःपरं ममापि कर्तव्यमस्ति वा न वा, कर्तव्याभावेऽपि इदानीं मम जीवन्मुक्तत्वमस्ति वा न वा, जीवन्मुक्तत्वेऽपि वर्तमानदेहपातानन्तरभाविनी विदेहमुक्तिर्भविष्यति वा न वा, विदेहमुक्तिप्राप्तावपि कालान्तरे पुनर्जन्म भविष्यति वा न वेत्यादिसंशयाश्छिद्यन्त । सशयरूपाः पाशाश्च परावरदर्शनशस्त्रेण खण्डयन्ते

इत्यर्थः । एवं सर्वसंशयेषु भिन्नेषु सत्सु अस्य कर्माणि च क्षीयन्ते । परावरदर्शनस्य देहारम्भनिरोधकत्वेऽपि वर्तमानदेहारम्भसमये तस्याविद्यमानत्वेन तन्निरोधकत्वासम्भवात् । "तस्य तावदेव चिरं यावन्न विमोक्ष्ये" "भूयश्चान्ते विश्वमायानिवृत्ति"रित्यादिश्रुतेश्च प्रारब्धकर्मणां भोगादेव क्षयादागामिकर्मणां च परावरसाक्षात्कारसमये अविद्यमानत्वात् पश्चात् सर्वेषामपि तेषामसंश्लेषाच्च जन्मकोटिसहस्रोपादानभूतानि सञ्चितान्यनारब्धशब्दवाच्यानि पुण्यापुण्यमिश्ररूपाणि कर्माण्येवात्र कर्मशब्देन विवक्ष्यन्ते । तानि सर्वाणि च क्षीयन्ते । परावरदर्शनाग्निना दग्धानि भवन्तीत्यर्थः । अन्यदृष्टिमाश्रित्यैव कर्मशब्दो व्याख्यातः । "अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत" इत्यादि श्रुतिसहस्रेष्वस्याशरीरत्वश्रवणादशरीरस्य परावरदर्शनानन्तरमप्यागामिकर्मण एव असम्भवात्प्रारम्भकर्मणा फलभोगोऽप्यस्याशरीरस्याभिमानाभावादारब्धानारब्धरूपाणि सर्वकर्माणि क्षीयन्ते इति स्वदृष्टयनुसारोऽयमर्थः । भिद्यते इत्यादिवर्तमानप्रयोगेण ज्ञानसमकालमुक्तत्वं द्योत्यते । अत्र प्रमाणं "तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति । ब्रह्मविद्ब्रह्मैव भवति । ब्रह्मविदाप्नोति परं । तरति शोकात्मवित् । अभयं वै जनक प्राप्तोऽसि । एतावदरे खल्वमृतत्वमिति । तमेव विदित्वा अतिमृत्युमेति । तमेवं विद्वानमृत इह भवति । यत्र नान्यत् पश्यति यत्र नान्यच्छृणोति, यत्र त्वस्य सर्वमात्मैवाभूदि" त्यादिश्रुतयः । "तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन् देहम् । ज्ञानसमकालमुक्तः कैवल्यं याति हतशोकः" इति

शेषवचनम् । "दर्शनादर्शने हित्वा स्वयं केवलरूपतः । यस्ति-
ष्ठति स तु ब्रह्म ब्रह्म न ब्रह्मवित्स्वय"मिति वसिष्ठवचनम् ।
"यस्मिन् काले स्वमात्मानं योगी जानाति केवलम् । तस्मात्
कालात्समारभ्य जीवन्मुक्तो भवेत्सदेति" पुराणवचनम् ।३१।

एवमवरशब्दवाच्यस्य जीवस्य ब्रह्मत्वे दर्शिते सति,
रूपं दृश्यमित्यारभ्याऽस्य जीवत्वमारोपादित्येतच्छ्लोकपर्य-
न्तेन ग्रन्थेन दर्शितमर्थं विस्मृत्यास्य साक्षिणः ब्रह्मत्वमेव
स्वरूपं चेत्तर्हि जीवत्वं नोपपद्यते, जीवत्वमेव स्वरूपं चेत्तदा
ब्रह्मत्वं नैवोपपद्यते, उभयथापि शास्त्रनैरर्थक्यं स्यादित्यशङ्क-
मानं शिष्यं प्रति अस्य साक्षिण एव उपाधिवशाज्जीवत्वं,
स्वभावतो ब्रह्मत्वं चोपपद्यते । तस्माच्छास्त्रनैरर्थक्यमपि न
स्यादिति प्रकरणपरिसमाप्तिपर्यन्तेन ग्रन्थसन्दर्भेण कृपया
पुनर्विविच्य प्रदर्शयिष्यन्नवरशब्दवाच्यजीवस्यावान्तरभेदं ता-
वत् दर्शयति—

अवच्छिन्नश्चिदाभासस्तृतीयः स्वप्नकल्पितः ।
विज्ञेयस्त्रिविधो जीवस्तत्राद्यः पारमार्थिकः ।। ३२ ।।

अवच्छिन्न इति ।। अवच्छिन्नः परिच्छिन्नः । परिपूर्णे
परब्रह्मण्यविद्याहङ्काराभ्यामवच्छेद्यं यत्साक्षिचैतन्यं, स एवा-
वच्छिन्नाख्यः प्रथमो जीवः स्यात् । चिदाभासः चिल्लक्षण-
रहितस्तद्वदवभासमानश्चिदाभासः । अन्तःकरणाख्ये अहङ्का-
रादिशब्दवाच्ये लिङ्गशरीरे प्रतिबिम्बितं यच्चैतन्यं स एव
चिदाभासाख्यो द्वितीयो जीवः स्यात् । स्वप्नावस्थायां नर-

पशुपक्ष्याद्यनेकशरीरलक्षणं परिगृह्य सर्वा दिशो यः परि-
भ्रमति स एव स्वप्नकल्पितस्तृतीयो जीवः स्यात् । एवं
जीवस्त्रिप्रकारो ज्ञातव्यः। तेषु जीवेषु मध्ये आद्योऽवच्छिन्नाख्यः
साक्षी पारमार्थिकः परमार्थभूतो ब्रह्मभूत इत्यर्थः ।। ३२ ।।

नन्ववच्छिन्नजीवस्यानवच्छिन्नब्रह्मभूतत्वं कथं संभवती-
त्याशङ्क्य तस्य स्वरूपनिरूपणद्वारेणारोपवशाज्जीवत्वं स्व-
भावतो ब्रह्मत्वं च तस्मिन्संभवतीत्याह—

अवच्छेदः कल्पितः स्याद्यवच्छेद्यं तु वास्तवम् ।
तस्मिन् जीवत्वमारोपाद्ब्रह्मत्वं तु स्वभावतः ।।३३।।

अवच्छेद इति ।। अवच्छेदावच्छेद्ययोर्जीवत्वब्रह्मत्व-
योश्च परस्परवैलक्षण्यद्योतकावुभावपि तु शब्दौ, अवधारण-
वाचकौ वा । ब्रह्मभूते साक्षिण्यविद्याहङ्कारकृतो योऽवच्छेदः
परिच्छेदः स आकाशे तलमलिनताद्यध्यासवदहङ्कारेणाध्यस्त
एव स्यात् । सुषुप्तावहङ्कारलये सत्यविद्यावच्छिन्नोऽहमह-
ङ्कारावच्छिन्नोऽहमित्युभयविधस्यावच्छिन्नत्वस्याप्यभिमाना -
भावादविद्याहङ्काराभ्यां परिच्छेद्यं यत्साक्षिचैतन्यं तत्कालत्रये
ऽप्येकरूपत्वाद्वास्तवमेव सत्यमेव स्यात् । एवं यस्मात्तस्मा-
दुक्तलक्षणे तस्मिन्साक्षिणि चिदाभासद्वारेणाहङ्कारसाक्षिणोर-
न्योन्याध्यासादेव जीवत्वं स्यात् । "कर्तृत्वादीन्बुद्धिधर्मान्
स्फूर्त्याख्यामात्मरूपताम् । दधद्विभाति पुरत आभासोऽतो
भ्रमो भवे"दिति वचनात् । प्रकृते साक्षिणि ब्रह्मत्वं स्वभावत
एव स्वतःसिद्धमेव स्यान्न तु चतुर्विध*क्रियासाध्यमित्यर्थः ।।

*चतुर्विधं फलं नाम । उत्पत्तिराप्तिः संस्कारो गुणान्तरमिति ।।

एवमस्य साक्षिणश्चिदाभासाहङ्काराख्योपाधिवशाज्जीवत्वं, स्वभावतो ब्रह्मत्वं चोपपत्तितो दर्शयित्वा, इदानीं अस्य साक्षिण एव ब्रह्मणा सह ऐक्यं वाक्यानि बोधयन्ति । नेतरयोश्चिदाभासस्वप्नकल्पितयोरित्याह—

अवच्छिन्नस्य जीवस्य पूर्णेन ब्रह्मणैकताम् ।
तत्त्वमस्यादिवाक्यानि जगुर्नेतरजीवयोः ।। ३४ ।।

अविच्छिन्नस्येति ।। अविद्याहङ्काराभ्यामवच्छिन्नस्यात एव सद्वितीयवत् प्रतीयमानस्य पारमार्थिकजीवस्यैवाविद्याश्रयभूतत्वेन देशकालवस्तुभिरनभिप्लुतेन परमात्मना "तत्त्वमसि, अहं ब्रह्मास्मि, अयमात्मा ब्रह्म, प्रज्ञानं ब्रह्मे"त्येवमादि वाक्यान्यैक्यं जगुः । आरोपितषष्ठ्यादिकमवलम्ब्य लक्षणावृत्त्या तात्पर्येणैक्यं बोधयन्तीत्यर्थः । चिदाभासस्वप्नकल्पितयोर्ब्रह्मणा सहैक्यं वाक्यानि न बोधयन्ति । तयोर्मायाकार्यत्वेनावस्तुभूतत्वादित्यभिप्रायः । ननु प्रमाणफलस्य प्रमातृगामित्वादहं ब्रह्मास्मीति चिदाभासेनैव प्रतिपन्नत्वेन तस्यैव प्रमातृत्वात्कूटस्थस्य साक्षिणः प्रमातृत्वासम्भवेन प्रमाणफलाश्रयत्वानुपपत्तेः, काकस्य कार्ष्ण्यं, धवलप्रासाद इतिवदन्यस्य फलमन्यस्य स्यादित्याचार्यैरसम्बद्धमेवोच्यते इति चेन्नैष दोषः। चिदाभासस्य साक्षिप्रतिबिम्बत्वेन तदर्थत्वादनिर्वचनीयमायाकल्पितत्वेनावस्तुत्वाच्चास्य प्रमाणफलाश्रयत्वानुपपत्तेः साक्षिणश्चिदाभासाधिष्ठानत्वेन तदात्मत्वात्परमार्थरूपत्वाच्च प्रमाणफलाश्रयोपपत्तेः । "प्रत्ययी प्रत्ययश्चैव यदाभासौ तदर्थता। तयोरचितिमत्त्वाच्च चैतन्ये कल्प्यते फलम् । कूटस्थेऽपि फलं

योग्यं राजनीव जयादिकम् । तदनात्मत्वहेतुभ्यां क्रियायाः प्रत्ययस्य चे"त्याचार्यैः कूटस्थस्य साक्षिणोऽपि प्रमाणफलाश्रयत्वमस्तीति समर्थितत्वाच्च । "ज्ञानिताज्ञानिते त्वात्माभासस्यैव न चात्मनः । तथा च कथमाभासः कूटस्थोऽस्मीति बुध्यताम् । नायं दोषश्चिदाभासः कूटस्थैकस्वभाववान् । आभासस्य च मिथ्यात्वात् कूटस्थत्वावशेषणा"दिति तृप्तिदीपाख्ये ग्रन्थे तैरेवाचार्यैराशङ्क्य परिहृतत्वाच्च ।। ३४ ।।

एवं पारमार्थिकजीवस्य साक्षिण एव परिपूर्णानन्दपरमात्मनैक्ये सिद्धे सत्यन्तर्बहिर्व्यष्टिसमष्टिभावेन जीवपररूपस्याविद्यावच्छिन्नस्य तत्त्वतोऽनवच्छिन्नब्रह्मरूपस्यास्य साक्षिण एव भोक्तृभोज्यात्मकसमस्तप्रपञ्चाधिष्ठानत्वम् अन्तर्बहिश्चोपाधिभूतयोश्चिदाभासजगतोर्मायाकार्यत्वेन मिथ्यात्वं, साक्ष्यनन्यत्वं, तन्मात्रेणावशेषत्वं चोत्तरग्रन्थसन्दर्भेण दर्शयितुं साक्षिणो जीवजगदधिष्ठानत्वं, जीवजगतोर्मायाकार्यत्वं च दर्शयति—

ब्रह्मण्यवस्थिता माया विक्षेपाऽऽवृतिरूपिणी ।
आवृत्याऽखण्डतां तस्मिन् जगज्जीवौ प्रकल्पयेत् ।।३५।।

ब्रह्मणीति ।। अत्रापि छन्दोभङ्गभयादेव पूर्वापरनिपातव्यत्यासः कृतः । शब्दतश्चार्थतश्च न पौनरुक्त्याख्यो दोषोऽत्र शङ्कनीयः । ब्रह्मात्मस्वरूपस्यालौकिकस्यातिसूक्ष्मत्वेन झटिति ज्ञातुमशक्यत्वादभ्यासेनैव प्रतिपत्तव्यत्वाच्छ्रुत्यैव नवकृत्व उपदिष्टत्वाच्च सत्यादिलक्षणो ब्रह्मण्यवस्थिताऽऽवृतिविक्षेप-

लक्षणशक्तिद्वयात्मिका अनिर्वचनीया माया, स्वाश्रयभूतस्य ब्रह्मणोऽखण्डतामाच्छाद्य तस्मिन्नवच्छेद्यसाक्षिस्वरूपे ब्रह्मणि जगज्जीवौ प्रकल्पयेत्पूर्वोक्तप्रकारेण सृजेदित्यर्थः ।। ३५ ।।

भोक्तृभोग्ययोर्मध्ये भोक्तृरूपस्य जीवस्यैव प्राधान्येऽपि पद्यानुसारेण जगज्जीवावित्युक्तमर्थक्रमानुसारेण । इदानीं तयोर्जीवजगतोः स्वरूपं विविच्य दर्शयति—

जीवो धीस्थश्चिदाभासो भवेद्भोक्ता हि कर्मकृत् ।
भोग्यरूपमिदं सर्वं जगत्स्याद्भूतभौतिकम् ।। ३६ ।।

जीव इति ।। कृष्यादिकं यज्ञादिकं श्रवणादिकं च कर्म करोतीति कर्मकृत् । स्वार्जितमैहिकामुष्मिकफललक्षणं भोगं भुनक्तीति भोक्ता । एवमुक्तलक्षणो यो धीस्थश्चिदाभासः स एव ब्रह्माश्रितमायाकल्पितो जीव इत्युच्यते । हिशब्दो यस्मादर्थे । धीस्थश्चिदाभासः कर्मकृद्भोक्ता च यस्मात्तस्माज्जीवो भवेदित्यक्षरयोजना । भूतं पृथिव्यादि, भौतिकं देवतिर्यगादिशरीरजातं, भूतं च भौतिकं च भूतभौतिकं । भोक्तृणां भोगाधिष्ठानभूतं तत्तच्छरीरानुरूपेण भोज्यरूपमिदं परिदृश्यमानं सर्वं भूतभौतिकं जगत्स्याज्जगदित्युच्यते ।। ३६ ।।

एवं जीवजगतोः स्वरूपं दर्शयित्वा इदानीमनयोरनिर्वचनीयमायाकार्यत्वेन मोक्षदशायामभावाद्व्यवहारमात्रे स्थितत्वाच्चैतदुभयं व्यावहारिकमित्याह—

अनादिकालमारभ्य मोक्षात्पूर्वमिदं द्वयम् ।
व्यवहारे स्थितं तस्मादुभयं व्यावहारिकम् ।। ३७ ।।

अनादिकालमिति ।। अस्मिन्काले आरब्धे एते जीवजगती इति विचार्य केनापि निर्णेतुमशक्यत्वात्, "प्रकृतिं पुरुषं चैव विध्यनादी उभावपी"ति भगवद्वचनाच्च अनयोर्जीवजगतोरादिर्नास्त्येव । "गताः कलाः पञ्चदश प्रतिष्ठां । यथा नद्यः स्यन्दमानास्समुद्रेऽस्तं गच्छन्ति । तस्य तावदेव चिरं । भूयश्चान्ते विश्वमायानिवृत्ति"रित्यादिश्रुतेः. "ततस्तिमितगम्भीरं न तेजो न तमस्ततम् । अनाख्यमनभिव्यक्तं यत्किञ्चिदवशिष्यते" इति वसिष्ठवचनाच्च, अनयोर्जीवजगतोर्वर्तमानदेहराहित्यलक्षणविदेहकैवल्यदशायामभावादन्तोऽस्त्येव । यस्मादेवं तस्मादनादिकालमारभ्य वर्तमानदेहराहित्यलक्षणविदेहकैवल्यप्राप्तेः पूर्वं प्रमातृप्रमाणप्रमेयाद्यनेकावान्तरभेदभिन्नत्रिपुट्यात्मके व्यवहारे जीवजगदाख्यमिदं वस्तुद्वयं स्थितम् । उक्तलक्षणं व्यवहारमाश्रित्य वर्तते । तस्मादेतदुभयं व्यावहारिकं, न तु पारमार्थिकं प्रातिभासिकं च । एवं जीवजगतोर्मायिकत्वं, साक्षिणो जीवजगदधिष्ठानत्वं मुखत एव ब्रह्मण्यवस्थिता मायेत्यस्मिन् श्लोके दर्शितम् । अस्मिन् श्लोके तयोर्मुखतो व्यावहारिकत्वकथनद्वारा मिथ्यात्वं दर्शितमधिष्ठानानन्यत्वमधिष्ठानावशेषत्वं चार्थात्सूचितम् ।। ३७ ।।

एवं ब्रह्मण्यवस्थितेत्यादिभिस्त्रिभिः श्लोकैः प्रदर्शितमर्थं स्वप्नजीवजगदवलम्बनेन दृढीकरिष्यामीत्यभिप्रायेण स्वप्नजीवजगतोर्निद्राकार्यत्वं दर्शयति—

चिदाभासस्थिता निद्रा विक्षेपाऽऽवृतिरूपिणी ।
आवृत्य जीवजगती पूर्वे नूत्ने तु कल्पयेत् ।। ३८ ।।

चिदाभासस्थितेति ।। व्यावहारिकजीवाख्यचिदाभासाश्रयाऽऽवृतिविक्षेपात्मिका तमोरूपा प्रसिद्धा निद्राऽऽवरणशक्त्याकारेण पूर्वे व्यावहारिकजीवजगती आवृत्य, ततो निद्राश्रयत्वेन निद्रावच्छिन्नचिदाभासस्वरूपं जाग्रत्समस्तप्रपञ्चसंस्कारसहिते देहस्थान्तर्नाडीमध्ये स्थितेऽस्मिन् निद्रावच्छिन्नचिदाभासाकारे विक्षेपशक्त्याकारेण नूत्ने नूतने जीवजगती कल्पयेत् । पूर्वनूतनजीवजगतोर्व्यावहारिकप्रातिभासिकत्ववैलक्षण्यद्योतनार्थस्तुशब्दः । यथा निद्रा चिदाभासाश्रया तथा मायाऽपि ब्रह्माश्रया, यथा निद्राऽऽवृतिविक्षेपाख्यशक्तिद्वयात्मिका तथा मायाऽपि शक्तिद्वयात्मिका, यथा स्वप्नजीवजगतोर्निद्राकार्यत्वं तथा व्यावहारिकजीवजगतोरपि मायाकार्यत्वं, यथा निद्रावच्छिन्नचिदाभासाकारस्य स्वप्नजीवजगदधिष्ठानत्वं तथा मायावच्छिन्नसाक्ष्याख्यब्रह्माकारस्यापि व्यावहारिकजीवजगदधिष्ठानत्वं स्यात् । तस्माद्ब्रह्मण्यवस्थिता मायेत्यनेन श्लोकेन प्रदर्शितेऽर्थे विप्रतिपत्तिहेतुः कोऽपि नास्तीत्यभिप्रायः ।। ३८ ।।

तु शब्देन द्योतितं वैलक्षण्यं स्पष्टयति ।।

प्रतीतिकाल एवैते स्थितत्वात्प्रातिभासिके ।
न हि स्वप्नप्रबुद्धस्य पुनः स्वप्ने स्थितिस्तयोः ।।३९।।

प्रतीतिकाल इति ।। प्रतीत्यनन्तरकालस्थितिं निषेधयत्येवकारः । प्रतीतिकाले एव वर्तमानत्वादेते स्वप्नजीवजगती प्रातिभासिके इत्युच्येते । इममेवार्थं व्यतिरेकमुखेनापि द्रढयति न हीति । एकस्मिन् दिने स्वप्नं दृष्ट्वा तस्मात्प्रबुद्धस्य दिनान्तरे दृश्यमाने स्वप्ने पूर्वदिनस्वप्नसम्बन्धिनोर्जीवजगतोरवस्थितिर्नास्ति यस्मात्तस्मात्ते प्रातिभासिके एव न तु व्यावहारिके । पारमार्थिकत्वशङ्कैव नास्ति । अनयोरनेन प्रातिभासिकत्वकथनेन स्वप्नजीवजगतोः प्रतीतिकाले एव स्थितत्वात्पुनः स्वप्ने स्थित्यभावाच्च मिथ्यात्वं । तथा व्यावहारिकजीवजगतोरप्यनादिकालमारभ्य मोक्षात्पूर्वं स्थितत्वात्ततः परमभावाच्चमिथ्यात्वं यस्मात्तस्मादनादिकालमारभ्येति अनेन श्लोकेन प्रदर्शितेऽर्थे विप्रतिपत्त्यवकाशो नास्तीत्यभिप्रायः ।। ३९ ।।

एवं स्वाप्नजीवजगद्दृष्टान्तेन संक्षेपेण प्रदर्शितं व्यावहारिकजीवजगतोर्मिथ्यात्वं पुनः स्वप्नदृष्टान्तमवलम्ब्य श्लोकत्रयेण दृढयितुं दृष्टान्तभूतयोः स्वप्नजीवजगतोर्मिथ्यात्वं तावद्दर्शयति—

प्रतिभासिकजीवो यस्तज्जगत्प्रातिभासिकम् ।
वास्तवं मन्यतेऽन्यस्तु मिथ्येति व्यावहारिकः ।। ४० ।।

प्रातिभासिकेति ।। स्वप्नकल्पितप्रातिभासिकाख्यो यो जीवः सः स्वप्नकल्पितं प्रातिभासिकाख्यं तज्जगद्वास्तवं मन्यते सत्यमित्यवगच्छति । न तु मिथ्येति । स्वस्य यावदवस्थानं तावत्तस्याप्यवस्थितत्वादन्योन्यपक्षव्यावृत्त्यर्थस्तुशब्दः। प्रातिभासिकादन्यो व्यावहारिकाख्यो जीवस्तत्प्रातिभासिकं जगच्च तद्द्रष्टारं प्रातिभासिकं जीवं च मिथ्येति मन्यते । न तु वास्तवमिति । स्वप्नात्पूर्वं स्वप्नानन्तरं प्रबोधे च तयोरुभयोरप्यवस्थानाभावादिति भावः ।। ४० ।।

दृष्टान्तेन प्रदर्शितं न्यायं दार्ष्टान्तिके योजयति—

व्यावहारिकजीवो यस्तज्जगद्व्यावहारिकम् ।
सत्यं प्रत्येति मिथ्येति मन्यते पारमार्थिकः ॥ ४१ ॥

व्यावहारिकेति ॥ उक्तलक्षणो यो व्यावहारिकजीवः स मायाकल्पितं तद्व्यावहारिकं जगत्सत्यं प्रत्येति वास्तवमित्यवगच्छति, न तु मिथ्येति । स्वस्य यावदवस्थानं तावत्तास्याप्यवस्थितत्वात्तस्मादन्यः पारमार्थिकजीवस्तद्व्यावहारिकं जगच्च तद्द्रष्टारं चिदाभासञ्च मित्येति मन्यते, एतदुभयमसत्यमित्यवगत्छति, न तु सत्यमति । नित्यप्रलयाख्यसुषुप्तौ तयोरनवस्थानस्यानुभवसिद्धत्वात् । "नासदासीन्नो सदासी"दित्यादिश्रुत्यनुसारेणानादित्वेऽपि "गताः कला" इत्यादिश्रुत्यनुसारेण वर्तमानदेहराहित्यलक्षणविदेहकैवल्यदशायां तयोः प्रतीतिरप्यात्यन्तिकनाशस्य निश्चितत्वात् श्रुत्याचार्यानुभववशात्स्वभावसिद्धे ब्रह्मात्मत्वे साक्षात्कृते सति भाविदेहराहित्यलक्षणजीवन्मुक्तिदशायां तयोर्व्यावहारिकजीवजगतोः कादाचित्कप्रतीतिसद्भावेऽपि तयोः सत्ताऽऽत्यन्तिकनाशस्य श्रुतियुक्त्यनुभवसिद्धत्वाच्च । तस्मात्प्रातिभासिकजीवजगती यथा मिथ्याभूते तथा व्यावहारिकजीवजगती च मिथ्यास्वरूपेति भावः ॥ ४१ ॥

मिथ्येति मन्यते पारमार्थिक इत्येतावता ग्रन्थेन प्रतिपादितमर्थं पुनर्द्रढयति—

पारमार्थिकजीवस्तु ब्रह्मैक्यं पारमार्थिकम् ।
प्रत्येति वीक्ष्यते नान्यद्वीक्षते त्वनृतात्मना ॥ ४२ ॥

पारमार्थिकेति ॥ अवधारणवाचकौ तु शब्दौ । पारमार्थिको जीवः साक्षात्परमात्मस्वरूपः । वर्तमानदेहराहित्यलक्षणविदेहकैवल्यप्राप्तिपर्यन्तं ब्रह्म चिच्छब्दलक्ष्यं साक्षिस्वगतादिभेदरहितं बन्धमोक्षादिव्यवहारातीतं सच्चिदानन्दलक्षणं स्वस्वरूपं ब्रह्मैक्यमेव पारमार्थिकमित्यवगच्छति । नान्यद्वीक्षते "यत्र नान्यत्पश्यति यत्र त्वस्य सर्वमात्मैवाभू"दित्यादिश्रुतेः । वीक्षते त्वनृतात्मना प्रबलप्रारब्धवशात् स्वरूपावस्थानाच्चिदाभासाकारेण व्युत्थितः सन्कदाचिज्जीवजगदादिकं यद्यपि वीक्षते, तथाऽपि मिथ्यात्वेनैव पश्यति, न तु सत्यत्वेनेत्ययमेव तात्पर्यार्थः ॥ ४२ ॥

एवं प्रतिभासिकजीवजगद्दृष्टान्तेन व्यावहारिकजीवजगतोर्मायाकार्यत्वमत एव मिथ्यात्वं च दृढीकृत्य, इदानीं दृष्टान्तभूतयोर्जीवजगतोरधिष्ठानचिदाभासानन्यत्वं तन्मात्रेणावशेषत्वं च प्रसिद्धमपि पुनरपि बाह्यदृष्टान्तेन दृढीकृत्य तेन बाह्याभ्यन्तरदृष्टान्तद्वयेनापि व्यावहारिकजीवजगतोरधिष्ठानभूतसाक्ष्यनन्यत्वं तन्मात्रेणावशेषत्वं च द्रढयितुं आरोपिताकारस्याधिष्ठानानन्यत्वे बाह्यदृष्टान्तं तावद्दर्शयति—

माधुर्यद्रवशैत्यानि नीरधर्मास्तरङ्गके ।
अनुगम्याथ तन्निष्ठे फेनेऽप्यनुगता यथा ॥ ४३ ॥

माधुर्यमिति ॥ यथा दृष्टान्ते माधुर्यं च द्रवत्वं च शैत्यं च माधुर्यद्रवशैत्यानि । नीरधर्मा जलगुणाः, जलस्योपरि वातवशात्तरङ्गे उत्पन्ने सति जलविवर्तत्वेन जलनिष्ठे तस्मिन्

तरङ्गे अनुगम्याथ तरङ्गोत्पत्त्यनन्तरं तत्तरङ्गविवर्तत्वेन तरङ्गनिष्ठे फेनेऽप्यनुगताः । जलतरङ्गः फेन इति भेदव्यवहारे विद्यमानेऽपि जलादीनां माधुर्यद्रवशैत्यव्यतिरेकेण स्वरूपाभावतया तेषां माधुर्यद्रवशैत्यात्मकत्वात् पूर्वपूर्वाधिष्ठानस्यैव उत्तरोत्तरव्यावृत्ताकारेण विवर्तमानत्वाद् उत्तरोत्तरकार्यस्य पूर्वपूर्वाधिष्ठानानन्यत्वं प्रदर्शितमनेन श्लोकेन ।। ४३ ।।

एवमारोपिताकारस्याधिष्ठानानन्यत्वं बाह्यदृष्टान्तेन दर्शयित्वा तमेव न्यायं दार्ष्टान्तिके योजयति—

साक्षिस्थाः सच्चिदानन्दाः सम्बन्धाद्व्यावहारिके ।
तद्द्वारेणानुगच्छन्ति तथैव प्रातिभासिके ।। ४४ ।।

साक्षिस्था इति ।। यथा दृष्टान्ते तथा दार्ष्टान्तिकेऽपि । ब्रह्मस्वरूपे साक्षिणि स्थिताः स्वरूपलक्षणशब्दवाच्याः सत्यज्ञानानन्दाः साक्षिगुणाः तरङ्गे जलगुणानां सम्बन्धवद्व्यावहारिकजीवजगतोः सम्बन्धाद्व्यावहारिकजीवजगद्व्यवधानेन प्रातिभासिकजीवजगतोरप्यनुवृत्ता भवन्ति । व्यावहारिकःप्रतिभासिक इत्येतौ व्यावहारिकप्रातिभासिकजगतोरप्युपलक्षणे । जीवयोस्तत्तज्जगदन्तःपातित्वेन जगद्व्यतिरेकेणाभावात् । साक्षिस्था इत्याधाराधेयभावो गुणगुणिभावश्च राहोः शिर इतिवदौपचारिकः । प्रातिभासिकजीवजगतोश्चिदाभासविवर्तकत्वे स्वभावतः प्रसिद्धेऽपि तरङ्गस्थानीयचिदाभासस्थाः सच्चिदानन्दा एव फेनस्थानीयप्रातिभासिकजीवजगतोरप्यनुगता इति, पुनरप्येवं निश्चिते सति यथा तयोः प्रातिभासिकयोर्जीव-

जगतोश्चिदाभासानन्यत्वं, यथा वा जलस्थमाधुर्यादीनामेव तरङ्गेऽप्यनुगतत्वेन तरङ्गस्थजलानन्यत्वं, यथा जलस्थानीये साक्षिणि स्थितानां माधुर्यादिस्थानीयानां सच्चिदानन्दानामेव तरङ्गस्थानीययोश्चिदाभासजगतोरप्यनुगतत्वेन, तयोः ब्रह्मभूतसाक्ष्यनन्यत्वं सिद्धमिति भावः । "एक एवात्मा मन्तव्यो जाग्रत्स्वप्नसुषुप्तिषु । स्थानत्रयव्यतीतस्य पुनर्जन्म न विद्यते" इत्यादिश्रुतेः ।। ४४ ।।

एवं व्यावहारिकजीवजगतोरधिष्ठानभूतसाक्ष्यनन्यत्वं दृष्टान्तमुखेन दर्शयित्वा, तदेव पुनरधिष्ठानावशेषत्वेन द्रढयितुं पूर्वोक्तमेव दृष्टान्तं दर्शयति—

लये फेनस्य तद्धर्मा द्रवाद्याः स्युस्तरङ्गके ।
तस्यापि विलये नीरे तिष्ठन्त्येते यथापुरा ।। ४५ ।।

लये इति ।। तरङ्गविवर्तस्य फेनस्य नाशे सति तत्फेनधर्माः द्रवमाधुर्यशैत्याख्याः फेनाधिष्ठाने तरङ्गे भवन्ति । जलविवर्तस्य तरङ्गस्यापि नाशे सत्येते द्रवाद्यास्तरङ्गफेनाद्युत्पत्तेः पूर्वं यथा सर्वाधिष्ठाने नीरे तिष्ठन्ति, तथा तिष्ठन्त्येव । कालत्रयेऽपि नीरस्य विद्यमानत्वात् तरङ्गफेनयोरविद्यमानत्वान्नीरजत्वान्नीरस्थत्वान्नीरलयत्वाच्च नीरव्यतिरेकेण तरङ्गफेनौ न स्त इत्यर्थः ।। ४५ ।।

दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके योजयति—

प्रातिभासिकजीवस्य लये स्युर्व्यावहारिके ।
तल्लये सच्चिदानन्दाः पर्यवस्यन्ति साक्षिणि ।। ४६ ।।

प्रातिभासिकेति ।। अत्रापि प्रातिभासिकजीवजगतोर्लये सति तत्र स्थिताः सच्चिदानन्दाः जाग्रत्प्रपञ्चसंस्कारसहिते चिदाभासे भवन्ति । अत्रापि तल्लये तज्जगतोऽप्युपलक्षण नित्यनैमित्तिकप्राकृतात्यन्तिकाख्येषु प्रलयेषु व्यावहारिकजीवजगतोर्लये सति तत्र स्थिताः सच्चिदानन्दाः सर्वाधिष्ठानभूते साक्षिण्येव पर्यवस्यन्ति निष्ठां प्राप्नुवन्ति, तस्याप्यधिष्ठानभूतस्य कस्यचिद्वस्तुनोऽभावात् । एवं साक्षिणः कालत्रयेऽपि सद्रूपत्वात् व्यावहारिकजीवजगदादेः सृष्टेः पूर्वं प्रलयानन्तरं चाविद्यमानत्वात्तज्जत्वात्तत्रस्थत्वात्तल्लयत्वाच्च तल्लक्ष्यब्रह्माभिन्नसाक्षिव्यतिरेकेण व्यावहारिकजीवजगदादिर्नास्त्येवेत्यर्थः । चोरव्याघ्रादीनामाभिमुख्यागमनेन प्रातिभासिकजीवकर्तृकेण तद्दर्शनेन निद्रावच्छिन्नचिदाभासस्यैव निद्राश्रयभूतेन चिदाभासेनैक्यविषये जागरणाख्ये प्रबोधे जाते सति, दिनान्तरे विद्यमानप्रातिभासिकजीवदृष्टया स्वरूपभूतचिदाभासाज्ञानपूर्वकसमस्तसंसारे विद्यमानेऽपि वर्तमानदिने चोरव्याघ्रादिदर्शनेन प्रबुद्धः प्रातिभासिकजीवः स्वदृष्टया शक्तिद्वयात्मकनिद्रात्यन्तिकनाशान्निद्राश्रयावच्छिन्नादिविभागरहिते एकरूपे चिदाभासे भृगुपतनादिकर्तेव स्वनाशेन चिदाभासपदं प्राप्तुमिच्छया प्रातिभासिकभोग्यरूपसमस्तप्रपञ्चेन सहात्यन्तिकनाशं यथा प्राप्नोति, तथा व्यावहारिकजीवोऽपि व्यावहारिकान्तरदृष्टया स्वरूपभूतप्रत्यगभिन्नसच्चिदानन्दलक्षणब्रह्मताज्ञानमूलसमस्तसंसारे विद्यमानेऽपि चोरव्याघ्राद्याभिमुख्यागमनस्थानीयेन श्रुत्याचार्यानुग्रहेण प्रातिभासिकजीवकर्तृकतद्दर्शनस्थानीयेन स्वकर्तृकश्रवणाद्यनुष्ठानेन निद्रावच्छिन्नचिदाभासस्थानीयस्य मायावच्छिन्नस्य स्वभावतोऽनवच्छिन्नस्य ब्रह्मरूपस्य साक्षिण एव निद्राश्रयभूतचिदाभासस्थानीयेन पूर्णेन ब्रह्मणैक्यविषये ब्रह्मविद्याख्ये प्रबोधे जाते सति स्वदृष्टया शक्तिद्वयात्मकमायात्यन्तिकनाशान्मायाश्रयावच्छिन्नादिभागरहिते, अत एव स्वगतादिभेदवर्जिते सच्चिदानन्दलक्षणे ब्रह्मात्मनि देवत्वकामनयाऽग्निप्रविष्टेव साक्षित्वमात्रावशेषवाञ्छया ब्रह्मसाक्षात्कारकालमारभ्य वर्तमानदेहराहित्यलक्षणविदेहकैवल्यप्राप्तिपर्यन्तं व्यावहारिकभोग्यरूपसमस्तप्रपञ्चेन सह शनैः शनैर्नाशं यात्यात्यन्तिकलयं प्राप्नोति । "देवत्वकामा अग्न्यादौ प्रविशन्ति यथा तथा । साक्षित्वेनावशेषाय स्वविनाशं स वाञ्छति । यावत्स्वदेहदाहः स्यान्नरत्वं नैव मुञ्चति । यावदारब्धदेहः स्यान्नाभासत्वविमोचन"मित्येतत्तैरेव तृप्तिदीपाख्ये ग्रन्थे उपपत्त्या सह प्रदर्शितत्वात्। तस्मादस्य चिदाभासस्य भ्रान्तिविवेकौ नित्यमुक्ते साक्षिण्यध्यस्तौ, न वास्तवावित्येतत्तैरेव भारतीतीर्थगुरुभिरुपनिषत्संक्षेपवार्तिके सम्यक् निरूपितम् । "बोधात्पुरा तु चिद्भ्रान्त्या मग्ना भोक्तरि शोचति । सा भ्रान्तिर्भोक्तृनिष्ठैव तद्विवेकोऽपि भोक्तृगः । भागावान्तरभेदो हि भ्रान्तितद्बोधकावुभौ । इतरारोपितत्वाच्च चित्यध्यस्तौ न वास्तवाविति । अस्य साक्षिणसाक्षित्वं साक्ष्यापेक्षं, न तु वास्तव"मित्येतदप्यद्वैतमकरन्दःकारैर्निरूपितम् । "चैत्योपरागरूपा मे साक्षिताऽपि न तात्त्विकी । उपलक्षणमेवेयं निस्तरङ्गचिदम्बुधे"रिति । चैत्यं जडपदार्थः । यस्मादेवं तस्माद्व्यावहारिकदृष्टयनुसारेण

मायाश्रयत्वं, मायाहङ्काराभ्यामवच्छिन्नत्वं, नामरूपतादात्म्येन भोग्यत्वं, अन्तःकरणे प्रतिबिम्बितच्चिदाभासाकारेण कर्तृत्वभोक्तृत्वादिरूपसंसारित्वं । "ब्रह्म वा इदमग्र आसीत् तदात्मानमेवावेदहं ब्रह्मास्मी"ति श्रुत्यनुसारेण ब्रह्मसाक्षात्कर्तृत्वं जीवन्मुक्तत्वं च विदेहमुक्तत्वं च । "न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः । न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थते"त्यादिश्रुतिप्रामाण्यात्परमार्थदृष्ट्यनुसारेण मायाश्रयत्वादिविदेहमुक्तित्वपर्यन्तसमस्तव्यवहारातीतत्वं च प्रत्यगभिन्नस्य सच्चिदानन्दलक्षणस्याद्वितीयस्यावाङ्मनसगोचरस्य ब्रह्मण एवोपपद्यते । अत एव मोक्षशास्त्रस्यापि साफल्यं स्यादित्ययमेवास्य प्रकरणस्य समस्तवेदान्तशास्त्रस्य महातात्पर्यत्वेन पिण्डीकृतोऽर्थः । तस्मात्सर्वमनवद्यमिति ॥ ४६ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दभारतीतीर्थमुनिवर्यशिष्य-
ब्रह्मानन्दभारतीप्रक्लृप्ता वाक्यसुधाटीका सम्पूर्णा ॥

शुभं भवतु ।